HITOPADEŚA

HITOPADESAS

ID EST

INSTITUTIO SALUTARIS.

[Narayana Pandit]

TEXTUM CODD. MSS. COLLATIS RECENSUERUNT

INTERPRETATIONEM LATINAM ET ANNOTATIONES CRITICAS

ADIECERUNT

AUGUSTUS GUILELMUS A SCHLEGEL

ET

CHRISTIANUS LASSEN.

PARS I.

TEXTUM SANSCRITUM TENENS.

BONNAE AD RHENUM

TYPIS REGIIS

MDCCCXXIX.

PROSTAT APUD EDUARDUM WEBER

BIBLIOPOLAM BONNENSEM.

AUGUSTUS GUILELMUS A SCHLEGEL

LECTORI

S.

In ea, quae adhuc fuit, hodieque perdurat, librorum Sanscritorum typis excusorum penuria, talium praesertim, qui tironibus commode exponi, aut ab ipsis adeo sine magistri auxilio legi possint, iam dudum utile mihi erat visum, parare novam editionem complexus fabularum narrationumque lepidissimarum, Hitôpadêsae nomine celebrati. Exstant quidem binae huius libri editiones, quarum altera anno 1804 Sriramapuri in Bengalia, altera sex annis post Londini prodiit. Sed ambae admodum sunt mendosae; Londinensis ultra etiam, quam ut credibile sit cuiquam, nisi qui accurate et singulatim exploraverit. Nulla autem re minus carere possunt exordia studii difficillimi quam textu castigato. Etenim quanto magis perseverantia et ingenii acumine pollet tiro, eo difficilius sibi ipsi satisfaciet: aliquid sese latere putabit, et omnem lapidem movebit, ut istud eruat, quotiescunque, vel sine ulla culpa sua, propter editoris ignoran-

tiam aut socordiam haeret in sententiarum structura singulisve verbis. Interim teritur tempus; perit, ut aiunt, oleum et opera: nam in aenigmatis sensu cassis Oedipus ipse frustra divinando laboret. Ceterum apprime idoneus est liber, qui in scholis legatur; cui usui adhibitum eum scimus, primum in academia Calcuttensi, deinde per complures annos in Hayleyburiensi; idoneus, inquam, non tam propter perspicuitatem, quae fortasse maior est in carminibus epicis, quam propter stili in diversis partibus varietatem. Haud sane miror, virum acutissimum et abstrusissima quaeque, tum in linguis, tum in disciplinis, tractare assuetum, HENRICUM THOMAM COLEBROOKE, dum totum perspicuitatis nomine commendat in observationibus editioni Sriramapurensi praemissis, pag. XII, ad pauca quaedam animum non advertisse, quae vel satis perito litterarum Sanscritarum, nedum tironi, aliquantum negotii facessere possint. Re vera, facilis plerumque intellectu est narratio, oratione soluta explicata, crebris personarum sermonibus intertextis; faciles quoque sunt ab antiquis poetis gnomicis epicisque petitae sententiae, nativam et candidam simplicitatem cum concinnitate ingeniosissima coniunctam prae se ferentes. At plane diversam indolem deprehendas in versibus, quos Hitôpadêsae auctor, vel compositor potius, libro suo inseruit e fabulis scenicis, e Bhartriharis Centuriis, omnino e serioris aevi poetis. Hi nimirum, ingenii lusibus et argutiis nimium quantum luxuriantes, splendent tum arte metrica operose elaborata,

tum dictione exquisitissima, sed interdum nimis contorta et calamistrata; ita ut negari nequeat, eiusmodi carmina callidiorem quam cetera postulare interpretem.

Plurima quidem, in quibus utraque editio aut alterutra saltem peccat contra grammaticam, contra orthographiam, contra metrum, denique contra sensum, primo adspectu sine ulla haesitatione tuto corrigere licet. In aliis autem locis, haud paucis numero, altius insedit latiusque serpsit corruptela, quam quae coniecturis modicis et paene certis sit sanabilis. Itaque intellexi, sine librorum manuscriptorum ope novam editionem satis emendatam concinnari non posse, et mature operae criticae praesidia circumspicere coepi. Asservatur in bibliotheca Franciae Regis codex unicus Hitôpadêsae, Bengalicus, in Catalogo Hamiltoniano numero CXLI notatus, scriptus *S'âka* 1618, i. e. A. Chr. 1696, quem nono abhinc anno, dum Parisiis commorabar, accurate cum editione Londinensi contuli, et trium priorum librorum variam lectionem excerpsi; quartum postea supplevit Lassenius noster. Duos codices Londini in Curia Indica exstantes, fragmentum tertii e libris Jonesii in bibliotheca Societatis Regiae scientiarum, inspeximus tantummodo: ad describendum neutri nostrum suppetebat otium, quum tota mente in Rameida intenti essemus. Vix e Britannia reducem invisit me vir illustris Liber Baro Schilling de Canstatt, Petropolitanus, Russiarum Imperatori a consiliis status. Is ingenio haud minus quam

urbanitate excellens, variarum linguarum gnarus, imprimis palaeographiae Asiaticae studiosus, et rarissimorum scripturae monumentorum conquisitor, multa habebat, quae mecum communicaret, multa quoque, quae ex me quaerere vellet; et per aliquot dies suavissime συμπεφιλολογήκαμεν. Inter cetera monstravit mihi codicem Hitôpadêsae chartaceum litteris Bengalicis exaratum, emptum e libris *Lebedevi* cuiusdam, Rutheni, qui in India olim peregrinator, complures codices secum in patriam retulit, nec non, aliquam linguae Sanscritae cognitionem adeptus, eiusdem grammaticam sermone Ruthenico scriptam edidit. Aperui generoso studiorum nostrorum fautori consilium meum de recensenda hac INSTITUTIONE SALUTARI. Pro ea, qua est humanitate, liberalissime mihi concessit usum codicis sui egregii, quem per omne tempus, quod huic labori impendi, manibus versare licuit, et identidem inspicere, si quando, ut fieri solet in libris Bengalicis, propter intricatiores vel parum distincte expressos litterarum ductus dubia esset lectio. Nihil, fateor, ad exsequendum consilium diu meditatum aeque erexit animum, ac singularis ista ex insperato mihi oblata opportunitas. Quod si lectores operam nostram qualemcunque boni consulent, sciant, favori et benevolentiae viri illustris supra laudati id ipsum deberi, quod eam omnino suscipere ausi sumus. Nactus igitur supellectilem criticam, etsi exiguam, tamen non plane contemnendam, quamprimum cura oppigneratam pro Rameide edenda fidem solvendi opere in-

choato paulisper sublevatus fui, recreationem aliquam e laboris varietate petiturus, horas subsecivas, quotquot lucrari poteram, coniunctim cum Lassenio, in Hitôpadêsa recensendo consumpsi. Qua in re quomodo versati simus, superest ut paucis exponam.

Praeter duos, quos memoravi, codices diligentissime collatos, librorum manuscriptorum vice adhibuimus utramque editionem et duplicem interpretationem Anglicam.

Editioni Sriramapurensi per se haud sane commendabili, ingens aestimatio accrevit eruditissima disputatione Colebrookii, de *Institutione salutari*, de antiquiore fabularum libro, PANCHATANTRA i. e. *Pentabiblio* inscripto, unde illius auctor sua se hausisse magna ex parte profitetur; de Pentabiblii aetate variisque fatis: quippe quod Nuschirvano regnante in Persiam est allatum, postea in linguam Arabicam versum, deinceps variis imitationibus per Asiam et Europam propagatum. At cave, ne praefationis auctorem cum editore confundas. Is fuit CAREIUS *), idem qui paucis annis post cum Marshmanno duo priores libros Ramayani edidit. Colebrookius autem tantum abest, ut editoris munere ulla ex parte functus sit, ut ne textum quidem typis excusum paulo accuratius eum inspexisse crediderim. Alioquin, quomodo dicere potuisset in fine praefationis severissimus rei

*) *Introductory Remarks*, p. XIV. »The editor, Mr. *Carey*, undertook the publication on a suggestion from the Council of the College of Fort William and under the patronage of government.«

criticae iudex: crebros typothetae novitii errores excusandos esse in labore tam inusitato, neque editoris negligentiae imputandos; confidere sese, quum complures Panditi (i. e. Indi litterati) totum volumen sedulo examinaverint, nullum mendum, quod quidem alicuius momenti sit, notitiam eorum effugisse *). Sed Panditorum pace dictum sit: et multo plura enotatis secura ab istorum indagine in textus latebris cubant; neque omnino ea est huius editionis conditio, cui corrigendorum indice medela afferri possit. Quid, quod in ipsum hunc indicem novi errores haud minus octo irrepserunt? Scilicet, ne ulla pars egregii operis vitiis suis careret, sicuti vulgo putant, pulcram faciem naevis quibusdam minutis fieri venustiorem. Sex codices, testante Colebrookio, textus recensendi gratia collati sunt; praelatae lectiones, quas aut maior codicum pars exhibebat, aut quae iudicio seu Careii, sive amanuensium eius aptiores visae sunt **). Utinam priorem legem ubique sequuti essent! Etenim con-

---

*) *Introd. Rem.* p. XV. »In this first attempt to employ the press in multiplying books with the Devanagari character, it will be no matter of surprise, nor any cause of imputation on the editor's diligence, that the table of corrections should be large. The whole volume has been carefully examined by several Pandits; and there is reason to believe, that no error of consequence can have escaped their notice.«

**) *Ib.* p. XIV. »In printing the *Hitôpadês'a*, six manuscript copies were collated. They were found to differ much, in the quotation of whole passages, as well as in the reading of single words. Either the reading, most suitable to the context, or that which was found in the greatest number of copies, has been selected, according as circumstances have dictated the propriety of following one rule or the other.«

sensus codicum aliquam habet auctoritatem; iudicium hominum vehementer averrunco, quod quam pravum fuerit aut potius nullum, unico exemplo demonstrasse sufficiet. In narratione Gruis coram rege suo Phoenicoptero explicata, pro secundo versu distichi, quod ultimum locum paginae 98 in editione Sriramapurensi occupat, vicarium margini adscriptum invenerunt, cum hac annotatione:

कुत्रचित् पुस्तकेऽयं पाठः । „*Haec est lectio codicis cuiusdam.*"

Eligendus erat versus alteruter, annotatio in locum suum infra paginam reiicienda. Sed astutius aliquid excogitarunt: utrumque, et versum vicarium et scholion, ne uncis quidem distinguendi caussa inclusum, in textum intruserunt. En tibi gruem, de varia lectione disserentem! Nae, huiuscemodi editores vix ultra gruem, vel cuculum etiam sapere apparet *).

Editor Londinensis, tametsi pro certo traditum accepi, quis fuerit, quandoquidem nomen suum neque titulo libri, neque praefationi Hayleyburii scriptae apposuit, illud tacere magis aequum arbitror, quam divulgare. Etenim laudes occultas in lucem protrahere et licet et iuvat; secus est in vituperandi necessitate. Quo de opere nil attinet amplius

*) Londinensis (cf. p. 74 in fine, et p. 75. init.) nihilo prudentior, scholion quidem, ipsi fortasse suspectum, sustulit, versum vicarium autem, a disticho suo alia interiecta sententia avulsum, tanquam partem sermonis oratione soluta habiti subiecit. Nos versum vicarium recepimus, altero eiecto. Cf. L. III, sl. 11.

hoc loco disputare post supra dicta. Cuncta, in quibus tum editio Sriramapurensis, tum Londinensis ab hac nostra discrepat, in commentario critico enotabuntur: quibus inter se comparatis, lectores ipsi iudices sunto. Declarat editor in fine praefationis, sese textum Sriramapurensem, utpote satis probum, recensioni suae pro fundamento substruxisse; sed collatis binis codicibus, versus addititios, quos alteruter exhiberet, suis quosque locis inseruisse; ubi lectio variaret, simplicissimam ubique praetulisse *).

Nacta est INSTITUTIO SALUTARIS duos interpretes Anglos, utrosque viros clarissimos et de litteris Indicis optime meritos, CAROLUM WILKINS et GUILELMUM JONESIUM. Illius translatio anno 1787 Londini prodiit; altera post mortem demum auctoris plenissimae operum omnium editioni tanquam corollarium adiecta est. Religio foret, morari in erroribus summorum virorum, grato animo potius a nobis semper venerandorum; quos errores et operis novitas excusat, et temporum conditio, nullis tunc linguae Sanscritae ediscendae adiumentis, neque grammatica, neque lexico, nedum editionibus librorum vere criticis, in lucem prolatis; denique ipsarum sententiarum peregrinitas, quae forma plerumque, interdum etiam sensu, propter religionum, legum,

*) »The Calcutta edition already furnished a good text. This, however, has been carefully collated with two manuscript copies. Such additional verses as these supplied have been inserted in their respective places; and where various readings occurred, the most simple has uniformly been preferred.«

morum dissimilitudinem a gnomicorum veterum vel nostratium quoque praeceptis toto coelo distant. Praeterea Jonesius, nondum positis litterarum Sanscritarum rudimentis, exercitationis modo gratia librum in sermonem patrium vertisse videtur, neutiquam eo consilio, ut stili properantis tentamina publici iuris faceret. Istud unice spectavimus, quamnam lectionem in singulis locis ante oculos habuerint interpretes Angli, quod fere haud difficile erat ad divinandum, etiamsi sententiam aut non satis perspexissent, aut minus accurate expressissent.

His igitur universis, videlicet prioribus editionibus, duplici interpretatione, et binis codicibus, altero Regio Parisiensi, altero Petropolitano, in unum collatis, lectionum tum proprias virtutes, tum auctoritatem aliunde accedentem diligenter, ne dicam anxie, pensitavimus. Discrepantiam quidem aliquanto minorem offendimus ea, quam inventum iri opinati fueramus. Etenim libros sanctitate quadam et antiquae memoriae maiestate venerabiles immunes ab adulteratione servavit Brachmanorum veluti publica cura; alios qui de disciplinis absconditis tractant, aut carmina etiam obscuriora, commentarii perpetui tuentur; in scriptis vero levioris argumenti et delectationis gratia compositis latius evagata est librariorum licentia, et impune id facere potuit. Quod cecidisse scimus in narratiuncularum complexus, qui inscripti sunt: *Psittaci septuagenarius; Lemuris, cadaver hominis patibulo affixi insidentis, quinus*

vicenarius; Statuarum magicarum, solio Vicramadityae adstantium, binus tricenarius. (S'uka-saptatî; Vêtâla-panchavins'atî; Sinhâsana-dvatrins'atî.) In horum exemplaribus, quotquot vidimus, sententiae metro inclusae, quibus perinde atque in Hitôpadêsa interstincta fuit narratio, suis locis apponuntur; narratio ipsa vero non solum nuda et consuetis ornamentis spoliata, sed numeris suis trunca, in arctissimum spatium contrahitur. Eiusmodi codices nullum alium in usum scripti esse videntur, quam ut adiuvent memoriam narratorum, qui per Indiam quaestum faciunt recitandis in publico fabellis, tum ingeniosa inventione, tum lascivia iocorumque petulantia auditores delectantibus, quales fortasse Milesiae olim fuerunt. Nimirum ficti argumenti satis bene meminit exercitatus narrator, sententiae autem doctiores sunt, quam ut in iis soli memoriae fidat. Hitopadesae exemplaria huius labis immunia mansisse crediderim, quia in ludis litterariis explicari solitus est liber, ut pueruli et morum praeceptis, et sensu stili purioris imbuerentur, cui usui auctor ipse librum suum destinaverat. (PROOEM. sl. 7.)

Multum sane variant codices in oratione soluta, sed raro eum in modum, quo argumentum ipsum afficiatur, aut rerum narratarum ordo turbetur. Nos tamen nihil prorsus negleximus, ne vocabula quidem, quibus colloquii vices indicantur, particulas versibus praemissas, diversam eorundem vocabulorum in oratione soluta dispositionem, ceterasque id genus varietates. In diiudicandis

lectionibus id imprimis spectari oportuit, auctorem argutam quandam brevitatem affectasse, et acutis lectoribus scripsisse, qui multa divinare quam quicquam sibi denuo inculcari mallent, tantoque magis fictionum novitate delectarentur, quanto frequentius, sine verborum ambagibus, alia aliam exciperet. Eiiciendae igitur erant putidae repetitiones et morae inutiles, utpote e scholiis margini adscriptis in textum illatae, etiamsi maiorem librorum partem insedissent; recipienda contra vel e singulo codice ea, quibus ἦθος aliquod inesset, aut facetia, aut vivida rerum personarumque imago.

In distichis rarius accidit, ut diversae lectiones eodem iure probae ac legitimae haberi possint; corruptela autem a sanitate facile distinguitur. Attamen interdum singulis hemistichiis aut integris versibus plane dissimilia substituuntur, quae non ab errore, sed a consilio sententiam alio deflectendi, et poetico variandi lusu profecta esse patet. Praecipuus librorum dissensus est in numero et delectu distichorum; aliquoties etiam non idem omnibus constat ordo. Qua ex parte omnino opposita fuit ratio nostra ei, quam Careius sive eius amanuenses et editor Londinensis sequuti sunt. Hi enim, quasi non de pondere et pretio, sed de copia qualicunque corradenda ageretur, quicquid versuum unus alterve codex suppeditasset, cupide arripuerunt; unde evenit, ut in editis aliquanto plures sententiae legantur, quam in codicibus nostris et apud Jonesium. Reprehendi fortasse

debet in libro ceteroquin ingeniosissimo nimia sententiarum cumulatio, et laxior nexus cum eo negotio, cui praecepta quaeruntur: tantum abest, ut alienis additamentis eius venustas et concinnitas augeatur. Sane in utramque partem disputari potest, utrum sententia quaedam, cui non omnes libri suffragentur, ab ipso auctore sit prolata necne: pronum est coniicere, a doctis lectoribus locos poetarum similes, quos meminerant, margini adscriptos, deinde in textum irrepsisse; altera ex parte librariorum negligentia et festinatio nonnulla, quae pristinis exemplaribus inerant, praeterire potuit. Nihilominus consensus codicum, diversis locis temporibusque scriptorum, in omittendo aliquid ponderis habet, quia non probabile est negligentiam, quae casu regitur, semper in eadem incidisse. Distichorum igitur, quae dubiae essent fidei, caussas ex uniuscuiusque opportunitate ceterisque virtutibus cognoscendas esse censuimus.

Alter e duobus codicibus, quos editor Londinensis sese contulisse ait, is idem fuit, quem V. Cl. CAROLUS WILKINS ante oculos habuit, quum Institutionem salutarem lingua Anglica exprimeret, quem codicem gravissimis vitiis laborare apparet. Quapropter ea, quae apud hos solos leguntur, haud dubitanter repudiavimus.

Plenissimam lectionis varietatem exhibebunt annotationes criticae, a Lassenio conscriptae. Eo reiicientur, quaecunque obelo confodimus, et singula excutientur. Non est igitur, Lector erudite, cur de iactura sollicitus sis: nihil de-

siderabis, et iudicio tuo uti poteris. Ibidem emendationum quoque ratio reddetur, quas non nisi paucissimas in textum intulimus, neque citra necessitatem. Obscuritas sola per se non satis idonea est caussa ad coniecturas confugiendi: ingenue potius fateatur editor, sibi non liquere; nisi demonstrare possit, sive grammatices sive metri leges esse violatas. De ratione grammatica quidem arduae subinde incidunt quaestiones, praesertim quum in libris nostratium, Europaeos dico, de lingua Sanscrita editis, caput istud, quod syntaxis nomine venditatur, vix eo honore dignum sit, et grammatici inter Indos, quamvis subtilissimi, hanc eandem partem minus accurate quam ceteras tractasse videantur. Ars metrica contra, sicuti musica, mathematicis rationibus quodammodo accommodata est; et metrum vitiatum utique medelam flagitat. Dominatur in Hitôpadêsa slocus communis, cuius tam simplex est structura, tam evidens caesura, tam faciles sunt motus, ut vel indoctorum auribus sua sponte se insinuent. Insunt porro disticha artificii exquisitioris et ampliore ambitu, sed metris monoschematicis adstricta, in quibus pedes certo ordine redeuntes, et definitus syllabarum numerus haud aegre ad amussim exigi possint. Plurimum difficultatis habet id versuum genus, quos poetae Indici non syllabarum numero nec pedibus certis, sed temporibus dimetiuntur. In his saepius emendatione restitui oportuit metrum corruptum, cuius singularem naturam captum librariorum, quales plerique sunt, superasse, profecto, qui

homines cognoverit, nemo mirabitur. De re metrica, quatenus ea, propter arctissimum cum rationibus criticis vinculum, huc pertinet, Lassenius disputabit, et diversa versuum genera, quotquot in toto Hitôpadêsa inveniuntur, in conspectu simul collocata nominibus suis numerisque signabit, ut lectorem de singulis inquirentem eo deinde remittat.

Librum in sermonem Latinum vertendi munus ego in me suscepi, quae commentarii perpetui species est brevitati maxime accommodata. Porro geographica, mythologica, physica, philosophica, leges, religiones, consuetudines Indorum proprias, nec vulgo notas, omnia denique, quorum obscuritas non in verbis, sed in rebus ipsis sita est, scholiis adiectis illustrabo. Quibus ad finem perductis speramus nihil desideratum iri, quod aut viris doctis ad legendum cum voluptate librum elegantissimum commodum esse possit, aut ad intelligendum tironibus necessarium.

Scribebam Bonnae Mense Iulio 1829.

अथ

हितोपदेशो नाम नीतिशास्त्रं ॥

HITOPADESAS

ID EST

INSTITUTIO SALUTARIS.

PROOEMIUM.

॥ शिवाय नमः ॥

सिद्धिः साध्ये सतामस्तु प्रसादात् तस्य धूर्जटेः ।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥ १ ॥
श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ २ ॥
अजरामरवत् प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ३ ॥
सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमं ।
अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा ॥ ४ ॥
संगमयति विद्यैव नीचगापि नरं सरित् ।
समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परं ॥ ५ ॥
विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥ ६ ॥

यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।
कथाछलेन बालानां नीतिस्तदिह कथ्यते ॥ ७ ॥
मित्रलाभः सुहृद्भेदो विग्रहः संधिरेव च ।
पञ्चतन्त्रात् तथान्यस्माद्ग्रन्थादाकृष्य लिख्यते ॥ ८ ॥

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरं । तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् । स भूपतिरेकदा प्रासादारूढः पथि गच्छता केनापि पठ्यमानं श्लोकद्वयं शुश्राव ।

अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शनं ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ ९ ॥
यौवनं धनसंपत्तिः प्रभुत्वमविवेकता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयं ॥ १० ॥

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास ।

कोऽर्थः पुत्रेण जातेन यो न विद्वान् न धार्मिकः ।
काणेन चक्षुषा किं वा चक्षुः पीडैव केवलं ॥ ११ ॥
अजातमृतमूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदे पदे ॥ १२ ॥

किं च । स जातो येन जातेन याति वंशः समुन्नतिं ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ १३ ॥

अन्यच्च । गुणिगणगणनारम्भे न पतति कठिनी सुसंभ्रमाद्यस्य ।
तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी भवति ॥ १४ ॥

अपि च । दाने तपसि शौर्ये च यस्य न प्रथितं मनः ।
विद्यायामर्थलाभे च मातुरुच्चार एव सः ॥ १५ ॥
अपरं च । वरमेको गुणी पुत्रो न च मूर्खशतैरपि ।
एकश्चन्द्रो तमो हन्ति न च तारागणैरपि ॥ १६ ॥
पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करं ।
तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः ॥ १७ ॥
तथाचोक्तं ।
अर्थागमो नित्यमरोगिता च प्रियश्च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड्जीवलोकेषु सुखानि राजन् ॥१८॥
को धन्यो बहुभिः पुत्रैः कुशूलपूरणाढकैः ।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता ॥ १९ ॥
ऋणकर्ता पिता शत्रुर्माता च व्यभिचारिणी ।
भार्या रूपवती शत्रुः पुत्रः शत्रुरपण्डितः ॥ २० ॥
अनभ्यासे विषं विद्या अजीर्णे भोजनं विषं
विषं सभा दरिद्रस्य वृद्धस्य तरुणी विषं ॥ २१ ॥
यस्य तस्य प्रसूतोऽपि गुणवान् पूज्यते नरः ।
धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥ २२ ॥
हाहा पुत्रक नाधीत सुगतैतासु रात्रिषु ।
तेन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि ॥ २३ ॥
तत् कथमिदानीमिति मम पुत्रा गुणवन्तः क्रियन्तां ।
आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणां ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥२४॥

यतः । धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकं ॥ २५ ॥
यच्चोच्यते । आयुः कर्म च वित्तं च विद्या निधनमेव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ २६ ॥
किं च । अवश्यं भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ २७ ॥
अपि च । यदभावि न तद्भावि भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते ॥ २८ ॥
एतत् कार्याक्षमाणां केषांचिदालस्यवचनं ।
यतः । न दैवमपि संचिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति ॥ २९ ॥
अन्यच्च ।
उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥
यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ३१ ॥
तथा च । पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते ।
तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः ॥ ३२ ॥
यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति ।
एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥ ३३ ॥
अपरं च । काकतालीयवत् प्राप्तं दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥ ३४ ॥

उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ३५ ॥
मातृपितृकृताभ्यासो गुणितामेति बालकः ।
न गर्भच्युतिमात्रेण पुत्रो भवति पण्डितः ॥ ३६ ॥

तथा ह्युक्तं ।

माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥ ३७ ॥
रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ३८ ॥
मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत् किंचिन्न भाषते ॥ ३९ ॥

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् । राजोवाच । भो भोः पण्डिताः श्रूयतां । अस्ति कश्चिदेवंभूतः

यो नाम मम पुत्राणां नित्यमुन्मार्गगामिनां ।
नीतिशास्त्रोपदेशेन पुनर्जन्म करिष्यति ॥ ४० ॥

यतः । काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिं ।
तथा सत्संनिधानेन मूर्खो याति प्रवीणतां ॥ ४१ ॥

उक्तं च । हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टतां ॥ ४२ ॥

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत् । देव महाकुलसमुद्भवा एते राजपुत्रा नीतिविद्यां ग्राहयितुं शक्यन्ते ।

यतः । नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।
न व्यापारशतेनापि शुकवत् पाठ्यते बकः ॥ ४३ ॥

अन्यच्च । अस्मिन्न निर्गुणं गोत्रे अपत्यमुपजायते ।
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥ ४४ ॥

अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान् नीतिशास्त्राभिज्ञान् करिष्यामि । राजा सविनयं पुनरुवाच ।

कीटोऽपि सुमनःसंगादारोहति सतां शिरः ।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥ ४५ ॥

अन्यच्च । यथोदयगिरौ द्रव्यं संनिकर्षेण दीप्यते ।
तथा सत्संनिधानेन हीनवर्णोऽपि दीप्यते ॥ ४६ ॥
गुणागुणज्ञा गुणिनो भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रभवन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥ ४७ ॥

तदेतेषामस्मत्पुत्राणां ज्ञानोपचये भवन्तः प्रमाणं । इत्युक्त्वा स राजा तस्य विष्णुशर्मणो बहुमानपुरस्कारं कृत्वा पुत्रान् समर्पितवान् । अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात् प्रस्तावक्रमेण स पण्डितोऽब्रवीत् ।

काव्यशास्त्रविनोदेन कालो गच्छति धीमतां ।
व्यसनेन तु मूर्खाणां निद्रया कलहेन वा ॥ ४८ ॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि । राजपुत्रैरुक्तं । आर्य कथ्यतां । विष्णुशर्मोवाच । शृणुत । संप्रति मित्रलाभः प्रस्तूयते यस्यायमाद्यः श्लोकः ॥

LIBER PRIMUS.

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः ।
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥ १ ॥

Fab. I. राजपुत्रा ऊचुः कथमेतत् । विष्णुशर्मा कथयति । अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः । तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति । अथ कदाचिदवसन्नायां रजन्यां चरमाचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत् । तमवलोक्याचिन्तयत् । अद्य प्रातरेवानिष्टदर्शनं जातं । तन्न जाने किमनभिमतं दर्शयिष्यति । इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः ।

यतः । शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितं ॥ २ ॥

अन्यच्च विषयिणामवश्यं कर्तव्यं ।

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितं ।
मरणव्याधिशोकानां किमद्य निपतिष्यति ॥ ३ ॥

अथ तेन व्याधेन तण्डुलकणान् विकीर्य जालं विस्तीर्णं । स च प्रच्छन्नो भूत्वा स्थितः । तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो

वियति विसर्पंस्तांस्तण्डुलकणान् अवलोकयामास । ततः कपोतराजस्तण्डुलकणलुब्धान् कपोतान् प्रत्याह । कुतोऽत्र निर्जने वने तण्डुलकणानां संभवः । तन्निरूप्यतां । तावन्न भद्रमिदं पश्यामि । प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यं ।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥ ४ ॥

Fab. II. कपोता ऊचुः कथमेतत् । चित्रग्रीवः कथयति । अहमेकदा दक्षिणारण्ये चरन्नपश्यं । एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते । भो भोः पान्थ इदं सुवर्णकङ्कणं गृह्यतां । तद्वचनमाकर्ण्य भयात् कोऽपि तत्पार्श्वं न भजते । ततो लोभाकृष्टेन केनचित् पान्थेनालोचितं । भाग्येनैतत् संभवति । किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया ।

यतः । अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।
यत्रास्ति विषसंसर्गोऽमृतं तदपि मृत्यवे ॥ ५ ॥

किंतु सर्वत्रार्थार्जने संदेह एव । तथा चोक्तं ।

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥ ६ ॥

तन्निरूपयामि तावत् । प्रकाशं ब्रूते । कुत्र तव कङ्कणं । व्याघ्रो हस्तं प्रसार्य दर्शयति । पान्थोऽवदत् । कथं मारात्मके त्वयि विश्वासः । व्याघ्र उवाच । शृणु रे पान्थ प्रागेव यौवनदशायामतिदुर्वृत्तोऽहं । अनेकगोमानुषाणां बधान्मे पुत्रा मृता दाराश्च वंशहीनश्चाहं । ततः केनचिदहमादिष्टः । दानधर्मादिकं चरतु भवान् । तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तः कथं न विश्वासभूमिः ।

यतः । इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ ७ ॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥ ८ ॥

मम चैतावाँल्लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । किंतु तथापि व्याघ्रो मानुषं खादतीति लोकप्रवादो दुर्निवारः ।

यतः । गतानुगतिको लोकः कुट्टनीमुपदेशिनीं ।
प्रमाणयति नो धर्मे यथा गोघ्नमपि द्विजं ॥ ९ ॥

मयापि धर्मशास्त्राण्यधीतानि । शृणु

प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन सर्वत्र दयां कुर्वन्ति साधवः ॥ १० ॥

अपरं च । प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ ११ ॥

अन्यच्च । मातृवत् परदारेषु परद्रव्येषु लोष्ट्रवत् ।
आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः ॥ १२ ॥

त्वं चातिदुर्गतस्तेन तत् तुभ्यं दातुं सयत्नोऽहं ।

तथा चोक्तं ।

दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनं ।
व्याधितस्यौषधं पथ्यं नीरुजस्तु किमौषधैः ॥ १३ ॥

अन्यच्च । दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतं ॥ १४ ॥

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं प्रतिगृहाण । ततो यावदसौ तद्वचः प्रतीतो लोभात् सरसि स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः । पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत् । अहह महापङ्के पतितोऽसि । अतस्त्वामहमुत्थापयामि । इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत् ।

न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः ।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ॥ १५ ॥

किं च । अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया ।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना ॥ १६ ॥

तन्मया भद्रं न कृतं यदत्र मारात्मके विश्वासः कृतः ।

तथा ह्युक्तं । नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा ।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च ॥ १७ ॥

अपरं च । सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः ।
अतीत्य हि गुणान् सर्वान् स्वभावो मूर्ध्नि वर्तते ॥ १८ ॥

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च । अतोऽहं ब्रवीमि कङ्कणस्य तु लोभेन इत्यादि । अथ सर्वथाविचारितं कर्म न कर्तव्यं । तथा चोक्तं ।

सुजीर्णमन्नं सुविचक्षणः सुतः सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत् कृतं सुदीर्घकालेऽपि न याति विक्रियां ॥

एतद्वचनं श्रुत्वा कश्चित् कपोतः सदर्पमाह । आः किमेवमुच्यते ।

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनं ॥ २० ॥

यतः । शङ्काभिः सर्वमाक्रान्तमन्नं पानं च भूतले ।
प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥ २१ ॥

तथा चोक्तं । ईर्षुर्घृणी दुःसंतुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥ २२ ॥

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः ।

यतः । सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः ।
छेत्तारः संशयानां च क्लिश्यन्ते लोभमोहिताः ॥ २३ ॥

अन्यच्च । लोभात् क्रोधः प्रभवति लोभात् कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणं ॥ २४ ॥

अनन्तरं सर्वे जालेन बद्धाः । ततो यस्य वचनात् तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति ।

यतः । न गणस्याग्रतो गच्छेत् सिद्धे कार्ये समं फलं ।
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥ २५ ॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच । नायमस्य दोषः ।

आपदामापतन्तीनां हितोऽप्यायाति हेतुतां ।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥ २६ ॥

अन्यच्च । स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः ।
न तु भीतपरित्राणवस्तूपालम्भपण्डितः ॥ २७ ॥

विपत्काले विस्मय एव कापुरुषलक्षणं । तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यतां ।

यतः । विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनां ॥ २८ ॥

अपरं च । षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ २९ ॥

इदानीमप्येवं क्रियतां । सर्व्वैरेकचित्तीभूय जालमादाय उड्डीयतां ।

यतः । अल्पानामपि वस्तूनां संहतिः कार्यसाधिका ।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते ऽपि हि दन्तिनः ॥ ३० ॥
संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि ।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ ३१ ॥

इति संचिन्त्य पक्षिणः सर्व्वे जालमादायोत्पतिताः । अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तान् अवलोक्य पश्चाद्धावन्नचिन्तयत् ।

संहतास्तु हरन्तीमे मम जालं विहंगमाः ।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥ ३२ ॥

ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु व्याधो निवृत्तः । अथ लुब्धकं व्यावृत्तं दृष्ट्वा कपोता ऊचुः । किमिदानीमुचितं । चित्रग्रीव उवाच ।

माता मित्रं पिता चेति स्वभावात् त्रितयं हितं ।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः ॥ ३३ ॥

तदस्मन्मित्रं हिरण्यको नाम मूषिकराजो गण्डकीतीरे चित्रवने निवसति । सो ऽस्माकं पाशांश्छेत्स्यति । इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः । हिरण्यकश्च तत्र सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति । ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः । चित्रग्रीवो ऽवदत् । सखे हिरण्यक किमस्मान् न संभाषसे । ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं बहिर्निःसृत्याब्रवीत् । आः पुण्यवान् अस्मि प्रियसुहृन्मे चित्रग्रीवः समायातः । पाशबद्धांश्च तान् अवलोक्य सविस्मयं क्षणं स्थित्वो-

वाच सखे किमेतत् । चित्रग्रीवोऽवदत् । सखेऽस्माकं प्राक्तनजन्मकर्मणः फलमेतत् ।

यस्माच्च येन च यथा च यदा च यच्च यावच्च यत्र च शुभाशुभमात्मकर्म ।
तस्माच्च तेन च तथा च तदा च तच्च तावच्च तत्र च विधातृवशादुपैति ॥

यतः । रोगशोकपरीतापबन्धनव्यसनानि च ।
आत्मापराधवृक्षाणां फलान्येतानि देहिनां ॥ ३५ ॥

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति । चित्रग्रीव उवाच । मित्र मा मैवं । अस्मदाश्रितानामेषां तावत् पाशांश्छिन्धि । हिरण्यकोऽप्याह । अहमल्पशक्तिर्दन्ताश्च मे कोमलाः । तदेतेषां पाशांश्छेत्तुं कथं समर्थः । तद्यावन्मे दन्ता न त्रुट्यन्ति तावद्भवतः पाशं छिनद्मि । तदनन्तरं यावच्छक्यमन्येषामपि बन्धनानि छेत्स्यामि । चित्रग्रीव उवाच । अस्त्वेवं । तथापि यथाशक्त्यैतेषां बन्धनान्यपनय । हिरण्यकेनोक्तं । आत्मपरित्यागेन यदाश्रितानां रक्षणं तन्नीतिविदां न संमतं ।

यतः । आपदर्थे धनं रक्षेद्दारान् रक्षेद्धनैरपि ।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ३६ ॥

अन्यच्च । धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः ।
तान् निघ्नता किं न हतं रक्षता किं न रक्षितं ॥ ३७ ॥

चित्रग्रीवोऽवदत् । सखे हिरण्यक नीतिस्तावदीदृश्येव । किंत्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथासमर्थः ।

यतः । धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ ३८ ॥

अयमपरश्चासाधारणो हेतुः ।

ज्ञातिद्रव्यबलानां च साम्यमेषां मया सह ।
मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति ॥ ३९ ॥

अन्यच्च । विना वर्तनमेवैते न त्यजन्ति ममान्तिकं ।
तन्मे प्राणव्ययेनापि जीवयैतान् ममाश्रितान् ॥ ४० ॥

किंच । मांसमूत्रपुरीषास्थिनिर्मिते च कलेवरे ।
विनश्वरे किमत्रास्था यशः पालय मित्र मे ॥ ४१ ॥

अपरं च पश्य । यदि नित्यमनित्येन निर्मलं मलवाहिना ।
यशः कायेन लभ्येत तदा लब्धं भवेन्न किं ॥ ४२ ॥

यतः । शरीरस्य गुणानां च दूरमत्यन्तमन्तरं ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥ ४३ ॥

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नुवाच । साधु मित्र साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते । एवमुक्त्वा तेन सर्वेषां बन्धनानि छिन्नानि । ततो हिरण्यकः सर्वान् सादरं संपूज्याह । सखे चित्रग्रीव सर्वथात्र जालबन्धनविधौ सति दोषमाशंक्यात्मन्यवज्ञा न कर्तव्या ।

यतः । योऽधिकाद्योजनशतात् पश्यतीहामिषं खगः ।
स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥ ४४ ॥

अपिच ।
शशिदिवाकरयोर्ग्रहपीडनं गजभुजंगमयोरपि बन्धनं ।
मतिमतां च विलोक्य दरिद्रतां विधिरहो बलवान् इति मे मतिः ॥

अन्यच्च । व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं ।
बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि ।

दुर्णीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः ।
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ ४६ ॥

इति प्रबोध्यातिथ्यं कृत्वालिंग्य च चित्रग्रीवं सोऽभिमतदेशं प्रस्थापयामास । हिरण्यकश्च स्वविवरं प्रविष्टः । अथ लघुपतनकः सर्ववृत्तान्तदर्शी साश्चर्यमिदमाह । अहो हिरण्यक श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । अतो मां मैत्र्येणानुगृहीतुमर्हसि । एतच्छ्रुत्वा हिरण्यको विवराभ्यन्तरादाह । कस्त्वं । स ब्रूते लघुपतनको नाम वायसोऽहं । हिरण्यको विहस्याह । का त्वया सह मैत्री ।

यतः । यद्येन युज्यते लोके बुधस्तत् तेन योजयेत् ।
अहमन्नं भवान् भोक्ता कथं प्रीतिर्भविष्यति ॥ ४७ ॥

अपरं च । भक्ष्यभक्षकयोः प्रीतिर्विपत्तेः कारणं महत् ।
शृगालात् पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥ ४८ ॥

Fab. III. वायसोऽब्रवीत् कथमेतत् । हिरण्यकः कथयति । अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः । स च मृगः स्वेच्छया भ्राम्यन् पुष्टाङ्गः शृगालेणालोकितः । तमालोक्याचिन्तयत् । आः कथमेतन्मांसं सुललितं भक्षयामि । भवतु । विश्वासं तावदुत्पादयामि । इत्यालोच्योपसृत्याब्रवीत् । मित्र कुशलं ते । मृगेणोक्तं कस्त्वं । स ब्रूते । क्षुद्रबुद्धिनामा जम्बुकोऽहमत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं भवन्तं मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि । अधुना तवानुचरेण मया सर्वदा भवितव्यं । मृगेणोक्तं एवमस्तु । ततोऽस्तं गते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ । तत्र चम्पकवृक्षशाखायां सुबुद्धिनामा काको मृगस्य मित्रं निवसति । तौ दृष्ट्वा

काकोऽवदत् । सखे चित्राङ्ग कोऽयं द्वितीयः । मृगो ब्रूते । जम्बुकोऽयमस्मत्सख्यमिच्छन्नागतः । काको ब्रूते । मित्र अकस्मादागन्तुना सह विश्वासो न युक्तः ।

तथा चोक्तं । अज्ञातकुलशीलस्य वासो देयो न कस्यचित् ।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः ॥ ४९ ॥

Fab. IV. तावाहतुः कथमेतत् । काकः कथयति । अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान् पर्कटीवृक्षः । तस्य कोटरे दैवदुर्विपाकाद्गलितनयनो जरद्गवनामा गृध्रः प्रतिवसति । अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किंचित् किंचिद्ददति तेनासौ जीवति । अथ कदाचिद्दीर्घकर्णो नाम मार्जारः पक्षिशावकान् भक्षयितुं तत्रागतः । ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयाकुलैः कोलाहलः कृतः । तच्छ्रुत्वा जरद्गवेनोक्तं । कोऽयमायाति । दीर्घकर्णो गृध्रमवलोक्य सभयमाह । हा हतोऽस्मि ।

यतः । तावद्भयस्य भेतव्यं यावद्भयमनागतं ।
आगतं च भयं वीक्ष्य नरः कुर्याद्यथोचितं ॥ ५० ॥

अधुनास्य संनिधाने पलायितुमक्षमः । तद्यथा भवितव्यं तथा भवतु । तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि । इत्यालोच्योपसृत्याब्रवीत् । आर्य त्वामभिवन्दे । गृध्रोऽवदत् कस्त्वं । सोऽब्रवीत् । मार्जारोऽहं । गृध्रो ब्रूते तद्दूरमपसर । नो चेद्धन्तव्योऽसि मया । मार्जारोऽवदत् । श्रूयतां तावद्वचनं । ततो यद्यहं बध्यस्तदा हन्तव्यः ।

यतः । जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय बध्यः पूज्योऽथ वा भवेत् ॥ ५१ ॥

गृध्रो ब्रूते । ब्रूहि किमर्थमागतोऽसि । सोऽवदत् । अहमत्र गङ्गातीरे

नित्यस्नायी निरामिषाशी ब्रह्मचर्येण चान्द्रायणव्रतं चरंस्तिष्ठामि युष्मांश्च धर्मज्ञानरतान् विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतः भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः ।

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ॥ ५२ ॥

यदि वा धनं नास्ति तदा प्रीतिवचसाप्यतिथिः पूज्यः ।

यतः । तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ ५३ ॥

अन्यच्च । बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः ॥ ५४ ॥

अपरं च । निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनि ॥ ५५ ॥

तथा चोक्तं ।

अतिथिर्यस्य भग्नाशो गृहात् प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्वा पुण्यमादाय गच्छति ॥ ५६ ॥
उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ ५७ ॥

गृध्रोऽवदत् । मार्जारा हि मांसरुचयः पक्षिशावकाश्चात्र निवसन्ति । तेनैवं ब्रवीमि । तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतमध्यवसितं । यतः परस्परं विवदमानानामपि धर्मशास्त्राणामहिंसा परमो धर्म इत्यत्रैकमत्यं ।

यतः । सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ ५८ ॥

अन्यच्च । एक एव सुहृद्धर्मो निधने ऽप्यनुयाति यः ।
शरीरेण समं नाशं सर्वमन्यत् तु गच्छति ॥ ५९ ॥

किंच । यो ऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरं ।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥ ६० ॥

अपि च । मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते ।
शक्यस्तेनानुमानेन परो ऽपि परिरक्षितुं ॥ ६१ ॥

शृणु पुनः । स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते ।
अस्य दग्धोदरस्यार्थे कः कुर्यात् पातकं महत् ॥ ६२ ॥

एवं विश्वास्य स मार्जारः तरुकोटरे स्थितः । ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति । अथ येषामपत्यानि खादितानि तैः शोकार्त्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा । तत् परिज्ञाय मार्जारस्तैरलक्ष्यमाणः कोटरान्निःसृत्य पलायितः । पश्चात् पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं ते ऊचुः । अनेनैव जरद्गवेनास्माकं शावकाः खादिताः । इति सर्वैः पक्षिभिर्निश्चित्य मेलकं कृत्वा गृध्रो व्यापादितः । अतो ऽहं ब्रवीमि अज्ञातकुलशीलस्य इत्यादि । इत्याकर्ण्य जम्बुकः सकोपमाह । मृगस्य प्रथमदर्शनदिने भवान् अप्यज्ञातकुलशील एव । तद्भवता सह कथमद्ययावदेतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्तते ।

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डो ऽपि द्रुमायते ॥ ६३ ॥

अन्यच्च । अयं निजः परो वेति गणना लघुचेतसां ।
उदारचरितानां तु वसुधैव कुटुम्बकं ॥ ६४ ॥

यथायं मृगो मम बन्धुस्तथा भवान् अपि। मृगोऽब्रवीत् किमनेनोत्तरोत्तरेण। सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयतां ।

यतः । न कश्चित् कस्यचिन्मित्रं न कश्चित् कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ६५ ॥

काकेनोक्तमेवमस्तु । अथ प्रातः सर्वे यथाभिमतदेशं गताः । एकदा तेन जम्बुकेन सुनिभृतमुक्तं । सखे अस्मिन् वनैकदेशे शस्यपूर्णं क्षेत्रमस्ति तदहं त्वां तत्र नीत्वा दर्शयामि । तथा कृते सति मृगः प्रत्यहं तत्र गत्वा शस्यं खादति । अथ क्षेत्रपतिना तद्दृष्ट्वा पाशास्तत्र नियोजिताः । अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत् । को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः । तत्रान्तरे जम्बुकस्तत्रोपस्थितोऽचिन्तयत् । फलितं तावदस्माकं कपटप्रबन्धेन । मनोरथसिद्धिरपि बाहुल्यान्मे भविष्यति । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । मृगस्तं दृष्ट्वोल्लासितं ब्रूते । सखे छिन्धि मम बन्धनं सत्वरं त्रायस्व मां ।

यतः । आपत्सु मित्रं जानीयाद्युद्धे शूरमृणे शुचिं ।
भार्यां क्षीणेषु वित्तेषु व्यसनेषु च बान्धवान् ॥ ६६ ॥

अपरं च । उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रसंप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥ ६७ ॥

जम्बुकः मुहुर्मुहुः पाशं विलोक्याचिन्तयत् । दृढस्तावदयं बन्धः । ब्रूते च । सखे स्नायुनिर्मिता एते पाशास्तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि । मित्र यदि नान्यथा मन्यसे तदा प्रभाते यत् त्वया वक्तव्यं तत् कर्तव्यं । इत्युक्त्वा

तत्समीपे आत्मानमाच्छाद्य स्थितः सः । अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्य इतस्ततो ऽन्विष्य तथाविधं दृष्ट्वोवाच सखे किमेतत् । मृगेणोक्तं अवधीरितसुहृद्वाक्यस्य फलमेतत् ।

तथाचोक्तं । सुहृदां हितकामानां यः शृणोति न भाषितं ।
विपत् संनिहिता तस्य स नरः शत्रुनन्दनः ॥ ६८ ॥
दीपनिर्वाणगन्धं च सुहृद्वाक्यमरुन्धतीं ।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः ॥ ६९ ॥

काको ब्रूते स वञ्चकः क्व । मृगेणोक्तं मन्मांसार्थी तिष्ठत्यत्रैव । काको ब्रूते मित्र उक्तमेव मया पूर्वं ।

अपराधो न मे ऽस्तीति नैतद्विश्वासकारणं ।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि ॥ ७० ॥
परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनं ।
वर्जयेत् तादृशं मित्रं विषकुम्भं पयोमुखं ॥ ७१ ॥

ततः काको दीर्घं निःश्वस्य । अरे वञ्चक किं त्वया पापकर्मणा कृतं ।

यतः । संलापितानां मधुरैर्वचोभिर्मिथ्योपचारैश्च वशीकृतानां ।
आशावतां श्रद्दधतां च लोके किमर्थिनां वञ्चयितव्यमस्ति ॥
अन्यच्च । उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापं ।
तं जनमसत्यसंधं भगवति वसुधे कथं वहसि ॥ ७३ ॥
दुर्जनेन समं सख्यं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करं ॥ ७४ ॥
दुर्जनः परिहर्तव्यो विद्ययालंकृतो ऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयंकरः ॥ ७५ ॥

अथ वा स्थितिरियं दुर्जनानां ।

प्राक् पादयोः पतति खादति पृष्ठमांसं कर्णे कलं किमपि रौति शनैर्विचित्रं ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः सर्वं खलस्य चरितं मशकः करोति ॥७६॥

तथा च । दुर्जनः प्रियवादी च नैतद्विश्वासकारणं ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषं ॥ ७७ ॥

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तं । मित्र त्वमात्मानं मृतवत् संदर्श्य वातेनोदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ । यदाहं शब्दं करोमि तदा त्वमुत्थाय सत्वरमपसरिष्यसि । मृगस्तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । आः स्वयं मृतोऽयं । इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान् संगृहीतुं सयत्नो बभूव । ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य क्षेत्रपतिना लगुडः प्रक्षिप्तः । तेन प्रहारेण शृगालो हतः । तथा चोक्तं ।

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते ॥ ७८ ॥

अतोऽहं ब्रवीमि भक्ष्यभक्षकयोः प्रीतिरित्यादि । काकः पुनराह ।

भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघः ॥ ७९ ॥

अन्यच्च । तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणां ।
सतां हि साधुशीलत्वात् त्वच्चित्रग्रीवयोरिव ॥ ८० ॥

किं च । साधोः परुषितस्यापि मनो नायाति विक्रियां ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ ८१ ॥

हिरण्यको ब्रूते । चपलस्त्वं चपलेन सह स्नेहः सर्वथा न कर्तव्यः ।
तथा चोक्तं । मार्जारो महिषो मेषो काकः कापुरुषस्तथा ।
विश्वासात् प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ ८२ ॥
किंतु शत्रुपक्षो भवान् अस्माकं । उक्तं चैतत् ।
शत्रुणा न हि संदध्यात् सुश्लिष्टेनापि संधिना ।
सुतप्तमपि पानीयं शमयत्येव पावकं ॥ ८३ ॥
अन्यच्च । यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ॥ ८४ ॥
अपरं च । महताप्यर्थसारेण यो विश्वसिति शत्रुषु ।
भार्यासु च विरक्तासु तदन्तं तस्य जीवितं ॥ ८५ ॥
लघुपतनको ब्रूते । श्रुतं मया सर्वं तथापि ममैतावान् संकल्पः यत् त्वया सह सौहृद्यमवश्यं करणीयं । नो चेदनाहारेणात्मानं भवद्वारि व्यापादयिष्यामि ।
तथा हि । मृद्घटवत् सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद् दुर्भेद्यश्चाशु संधेयः ॥ ८६ ॥
किं च । द्रवत्वात् सर्वलोहानां निमित्तान्मृगपक्षिणां ।
भयाल्लोभाच्च मूर्खाणां संगतं दर्शनात् सतां ॥ ८७ ॥
तज्ज्ञात्वा सतां संगतमिष्यते ।
यतः । स्नेहच्छेदेऽपि साधूनां गुणा नायान्ति विक्रियां ।
भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ॥ ८८ ॥
अन्यच्च शृणु । शुचित्वं त्यागिता शौर्यं समानसुखदुःखता ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ ८९ ॥

एतैर्गुणैरुपेतो भवदन्यो मया कः पुमान् प्राप्तव्यः । तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह । आप्यायितोऽहं भवतामनेन वचनामृतेन । तथा ह्युक्तं ।

घर्मार्त्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली ।
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितं ।
प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः ।
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमन्त्रोपमं ॥ १० ॥

अन्यच्च । रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणं ॥ ११ ॥

अनेन वचनक्रमेण तदेकमपि दूषणं त्वयि न लक्ष्यते ।

यतः । पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥ १२ ॥

अपरं च । अन्यथैव हि सौहार्दं द्रवस्वच्छान्तरात्मनः ।
प्रवर्तते ऽन्यथा वाणी शाठ्योपहतचेतसः ॥ १३ ॥

तद्भवतु भवतोऽभिमतमेव । ततः प्रभृति तयोः सख्यमभवत् । ततो हिरण्यको भोजनविशेषैर्वायसं संतोष्य विवरं प्रविष्टः । वायसोऽपि स्वस्थानं गतः । ततस्तयोः प्रत्यहमन्योन्याहारदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कालोऽतिवर्तते । एकदा वायसो हिरण्यकमाह । सखे वायसस्य कष्टलभ्याहारमिदं स्थानं । तदेतत् परित्यज्य स्थानान्तरं गन्तुमिच्छामि । हिरण्यको ब्रूते ।

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।
इति विज्ञाय मतिमान् स्वस्थानं न परित्यजेत् ॥ १४ ॥

काको ब्रूते मित्र कापुरुषवचनमेतत् ।

यतः । स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यान्ति काकाः कापुरुषा मृगाः ॥ ९५ ॥

अन्यच्च । को वीरस्य मनस्विनः स्वविषयः को वा विदेशः स्मृतो ।
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितं ।
यद्दंष्ट्रानखलांगुलप्रहरणः सिंहो वनं गाहते ।
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ ९६ ॥

हिरण्यको ब्रूते मित्र क्व गन्तव्यं ।

तथा चोक्तं । चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ ९७ ॥

वायसो ब्रूते अस्ति मित्र स्थानं सुनिरूपितं । हिरण्यकोऽवदत् किं तत् । वायसो ब्रूते । अस्ति दण्डकारण्ये कर्पूरगौराख्यं सरः । तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कूर्मः सहजधार्मिकः प्रतिवसति ।

यतः । परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणां ।
धर्मे स्वयमनुष्ठानं कस्यचित् तु महात्मनः ॥ ९८ ॥

स च मत्स्याहारविशेषैर्मां संवर्धयिष्यति । हिरण्यकोऽब्रवीत् । तत् किं मयात्रावस्थाय कर्तव्यं ।

यतः । यस्मिन् देशे न सन्मानं न वृत्तिर्न च बान्धवाः ।
न च विद्यागमः कश्चित् तं देशं परिवर्जयेत् ॥ ९९ ॥

अपरं च । धनिनः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ १०० ॥

ततो मामपि तत्र नय । अथ वायसस्तेन मित्रेण सह विचित्रकथालापैः

सुखेन तस्य सरसः समीपं जगाम । ततो मन्थरो दूरादवलोक्य लघुपतनकस्य यथोचितमातिथ्यं विधाय मूषिकस्याप्यतिथिसत्कारं चकार ।

यतः । गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ १०१ ॥

वायसोऽवदत् । वयस्य मन्थर सविशेषमस्मै पूजां विधेहि । यतोऽयं पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यको नाम मूषिकराजः । एतस्य गुणस्तुतिं जिह्वासहस्रेण द्वितीयेनापि सर्पेश्वरो न कदाचित् कर्तुं समर्थः स्यात् । इत्युक्त्वा चित्रग्रीवोपाख्यानमुपवर्णितवान् । मन्थरः सादरं हिरण्यकं संपूज्याह । अत्रात्मनो निर्जनवनावस्थानकारणमाख्यातुमर्हसि । हिरण्यकोऽवदत् कथयामि श्रूयतां । अस्ति चम्पकाभिधानायां नगर्यां

Fab. V. परिव्राजकावसथः । तत्र चूडाकर्णो नाम परिव्राजकः प्रतिवसति । स च भोजनावशिष्टभिक्षान्नसहितं भिक्षापात्रं नागदन्तकेऽवस्थाप्य स्वपिति । अहं च तदन्नमुत्प्लुत्य प्रत्यहं भक्षयामि । अनन्तरं तस्य प्रियसुहृद्वीणाकर्णो नाम परिव्राजकस्तत्र समायातः । तेन सह नानाकथाप्रसङ्गावस्थितोऽपि चूडाकर्णो मम त्रासार्थं जर्जरवंशखण्डेन भूमिमताडयत् । वीणाकर्ण उवाच । किमिति मम कथाविरक्तोऽन्यासक्तो भवान् । चूडाकर्णो वदति । भद्र नाहं विरक्तः किंतु पश्यायं मूषिको ममापकारी सदा पात्रस्थं भिक्षान्नमुत्प्लुत्य भक्षयति । वीणाकर्णो नागदन्तकमवलोक्याह । कथं मूषिकः स्वल्पबलोऽप्येतावद्दूरमुत्पतति । तदत्र केनापि कारणेन भवितव्यं ।

तथाचोक्तं । नाकस्माद्युवती वृद्धं केशेष्वाकृष्य चुम्बति ।
पतिं निर्दयमालिंग्य हेतुरत्र भविष्यति ॥ १०२ ॥

Fab. VI. चूडाकर्णः पृच्छति कथमेतत् । वीणाकर्णः कथयति । अस्ति गौडविषये

कौशाम्बी नाम नगरी । तस्यां चन्दनदासनामा बणिक्महाधनो निवसति । तेन पश्चिमे वयसि वर्तमानेन कामाधिष्ठितचेतसा धनदर्पाल्लीलावती नाम बणिक्पुत्री परिणीता । सा च मकरकेतोर्विजयवैजयन्तीव यौवनवती बभूव । स च वृद्धपतिस्तस्याः संतोषाय नाभवत् ।

यतः । शशिनीव हिमार्त्तानां घर्मार्त्तानां रवाविव ।
मनो न रमते स्त्रीणां जराजीर्णेन्द्रिये पतौ ॥ १०३ ॥

अन्यच्च । पलितेष्वपि दृष्टेषु पुंसः का नाम कामिता ।
भैषज्यमिव मन्यन्ते यदन्यमनसः स्त्रियः ॥ १०४ ॥

स च वृद्धस्तस्यामतीवानुरागवान् ।

यतः । धनाशा जीविताशा च गुर्वी प्राणभृतां सदा ।
वृद्धस्य तरुणी भार्या प्राणेभ्योऽपि गरीयसी ॥ १०५ ॥

अपि च । नोपभोक्तुं न च त्यक्तुं शक्नोति विषयान् जरी ।
अस्थि निर्दशनः श्वेव जिह्वया लेढि केवलं ॥ १०६ ॥

अथ सा लीलावती यौवनदर्पादतिक्रान्तकुलमर्यादा केनापि बणिक्पुत्रेण सहानुरागवती बभूव ।

यतः । स्वातन्त्र्यं पितृमन्दिरेऽपि वसतिर्यात्रोत्सवे संगतिर्
गोष्ठीपूरुषसंनिधावनियमो वासो विदेशे तथा ।
संसर्गः सह पुंश्चलीभिरसकृद्वृत्तेर्निजायाः क्षतिः ।
पत्युर्वार्द्धकमीर्षितप्रवसनं नाशस्य हेतुः स्त्रियाः ॥ १०७ ॥

अपरं च ।
पानं दुर्जनसंसर्गः पत्या च विरहोऽटनं ।
स्वप्नश्चान्यगृहे वासो नारीणां दूषणानि षट् ॥ १०८ ॥

किंच । स्थानं नास्ति क्षणं नास्ति नास्ति प्रार्थयिता नरः ।
तेन नारद नारीणां सतीत्वमुपजायते ॥ १०९ ॥
सुवेशं पुरुषं दृष्ट्वा भ्रातरं यदि वा सुतं ।
योनिः क्लिद्यति नारीणां सत्यं सत्यं हि नारद ॥ ११० ॥
स्त्रियो हि चपला नित्यं देवानामपि विश्रुतं ।
ताश्चापि रक्षिता येषां ते नराः सुखभागिनः ॥ १११ ॥
अपरं च । घृतकुम्भसमा नारी तप्ताङ्गारसमः पुमान् ।
तस्माद्घृतं च वह्निं च नैकत्र स्थापयेद्बुधः ॥ ११२ ॥
अपि च । पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्राश्च स्थविरे भावे न स्त्री स्वातन्त्र्यमर्हति ॥ ११३ ॥

एकदा सा लीलावती रत्नावलीकिरणकर्बुरे पर्यङ्के तेन बणिक्पुत्रेण सह विश्रम्भालापैः सुखासीना तमलक्षितोपस्थितं पतिमवलोक्य सहसोत्थाय केशेषु गृहीत्वा निर्भरमालिंग्य चुम्बितवती । अत्रान्तरे जारश्च पलायितः ।

उक्तं च । उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ।
स्वभावेनैव तत् सर्वं स्त्रीबुद्धौ सुप्रतिष्ठितं ॥ ११४ ॥

तदालिङ्गनमवलोक्य समीपवर्तिनी कुट्टण्यचिन्तयत् । नाकस्मादियमेनमुपगूढवतीति । ततस्तया कुट्टण्या तत्कारणं जारं परिज्ञाय सा लीलावती गुप्तेन दण्डेन दण्डिता । अतोऽहं ब्रवीमि नाकस्माद्युवती वृद्धमित्यादि । मूषिकबलोपस्तम्भेन केनापि कारणेनात्र भवितव्यं । क्षणं विचिन्त्य परिव्राजकेनोक्तं । धनमेव कारणं बाहुल्याद्भविष्यति ।

यतः । धनवान् बलवाँल्लोके सर्वः सर्वत्र सर्वदा ।
प्रभुत्वं धनमूलं हि राज्ञामप्युपजायते ॥ ११५ ॥

ततः खनित्रमादाय तेन परिव्राजकेन मम विवरं खनित्वा चिरसंचितं धनं गृहीतं । ततः प्रत्यहं निजशक्तिहीनः सत्त्वोत्साहरहितः स्वाहारमप्युत्पादयितुमशक्तः सत्रासं मन्दं मन्दं सर्पञ्चूडाकर्णेनावलोकितः । ततस्तेनोक्तं ।

अर्थेन बलवान् सर्व अर्थाद्भवति पण्डितः ।
पश्यैनं मूषिकं पापं स्वजातिसमतां गतं ॥ ११६ ॥

किंच । अर्थेन परिहीणस्य पुरुषस्याल्पमेधसः ।
क्रियाः सर्वा विनश्यन्ति ग्रीष्मे कुसरितो यथा ॥ ११७ ॥

अपरं च । यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः ।
यस्यार्थाः स पुमाँल्लोके यस्यार्थाः स च पण्डितः ॥ ११८ ॥

ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनं ।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥ ११९ ॥

अन्यच्च । अपुत्रस्य गृहं शून्यं सन्मित्ररहितस्य च ।
मूर्खस्य च दिशः शून्याः सर्वशून्या दरिद्रता ॥ १२० ॥

अपि च ।
तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव अन्यः क्षणेन भवतीति विचित्रमेतत् ॥

एतत् सर्वमाकर्ण्य मयालोचितं ममात्रावस्थानमयुक्तं । इदानीं यच्चान्यस्मै वृत्तान्तकथनं तदप्यनुचितं ।

यतः । अर्थनाशं मनस्तापं गृहे दुश्चरितानि च ।
वञ्चनं चापमानं च मतिमान् न प्रकाशयेत् ॥ १२२ ॥

अपि च । आयुर्वित्तं गृहच्छिद्रं मन्त्रमैथुनभेषजं ।
तपोदानापमानं च नव गोप्यानि यत्नतः ॥ १२३ ॥

तथा चोक्तं ।

अत्यन्तविमुखे दैवे व्यर्थयत्ने च पौरुषे ।
मनस्विनो दरिद्रस्य वनादन्यत् कुतः सुखं ॥ १२४ ॥

अन्यच्च । मनस्वी म्रियते कामं कार्पण्यं न तु गच्छति ।
अपि निर्वाणमायाति नानलो याति शीततां ॥ १२५ ॥

किं च । कुसुमस्तवकस्येव द्वे वृत्ती तु मनस्विनः ।
सर्वेषां मूर्ध्नि वा तिष्ठेद्विशीर्येत वनेऽपि वा ॥ १२६ ॥

यच्चात्रैव याच्ञाजीवनं तदतीव गर्हितं ।

यतः । वरं विभवहीनेन प्राणैः संतर्पितोऽनलः ।
नोपचारपरिभ्रष्टः कृपणः प्रार्थ्यते जनः ॥ १२७ ॥

अपरं च । दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात् परिभ्रश्यते ।
निःसत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते ।
निर्बुद्धिः क्षयमेत्यहो विधनता सर्वापदामास्पदं ॥ १२८ ॥

किंच । वरं मौनं कार्यं न च वचनमुक्तं यदनृतं ।
वरं क्लैब्यं पुंसां न च परकलत्राभिगमनं ।
वरं प्राणत्यागो न च पिशुनवादेष्वभिरतिर् ।
वरं भिक्षाशित्वं न च परधनास्वादनसुखं ॥ १२९ ॥

अपि च । सेवेव मानमखिलं ज्योत्स्नेव तमो जरेव लावण्यं ।
हरिहरकथेव दुरितं गुणशतमप्यर्थिता हरति ॥ १३० ॥

इति विमृश्य तत् किमहं परपिण्डेनात्मानं भोजयामि । कष्टं भो तदपि द्वितीयं मृत्युद्वारं ।

यतः । पल्लवग्राहि पाण्डित्यं क्रयक्रीतं च मैथुनं ।
भोजनं च पराधीनं तिस्रः पुंसां विडम्बनाः ।। १३१ ।।

अन्यच्च । रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सो ऽस्य विश्रामः ।। १३२ ।।

इत्यालोच्यापि तदन्नं लोभात् पुनर्ग्रहीतुं ग्रहमकरवं ।

तथा चोक्तं ।
लोभेन बुद्धिश्चलति लोभो जनयते तृषां ।
तृषार्त्तो दुःखमाप्नोति परत्रेह च मानवः ।। १३३ ।।

ततो ऽहं वीणाकर्णेन जर्जरवंशखण्डेन ताडितो ऽचिन्तयं ।
धनलुब्धो ह्यसंतुष्टो ऽनियतात्माजितेन्द्रियः ।
सर्वा एवापदस्तस्य यस्य तुष्टं न मानसं ।। १३४ ।।

तथा च । सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसं ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ।। १३५ ।।

अन्यच्च । संतोषामृततृप्तानां यत् सुखं शान्तचेतसां ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावतां ।। १३६ ।।

किं च । तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितं ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितं ।। १३७ ।।

अपि च । असेवितेश्वरद्वारमदृष्टविरहव्यथं ।
अनुक्तक्लीववचनं धन्यं कस्यापि जीवितं ।। १३८ ।।

यतः । न योजनशतं दूरं वाह्यमानस्य तृष्णया ।
संतुष्टस्य करप्राप्ते ऽप्यर्थे भवति नादरः ।। १३९ ।।

तत् सर्वदावस्थोचितः कार्यपरिच्छेदः श्रेयान् ।

उक्तं च । को धर्मो भूतदया किं सौख्यमरोगिता जगति जन्तोः ।
कः स्नेहः सद्भावः किं पाण्डित्यं परिच्छेदः ॥ १४० ॥
तथा हि । त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ १४१ ॥
किं च । महतां स्थानमाश्रित्य फलं कर्मानुसारतः ।
श्रीकण्ठकण्ठलग्नोऽपि वासुकिर्वायुभक्षकः ॥ १४२ ॥
अपरं च । पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरं ।
विचार्य खलु पश्यामि तत् सुखं यत्र निर्वृतिः ॥ १४३ ॥

इत्यालोच्याहं निर्जनं वनमागतः । यतः ।
वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयः पक्वफलाम्बुभक्षणं ।
तृणानि शय्या परिधानवल्कलं न बन्धुमध्ये धनहीनजीवनं ॥ १४४ ॥

ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः । अधुना च पुण्यपरंपरया भवदाश्रयः स्वर्ग एवायं मया प्राप्तः ।
यतः । संसारविषवृक्षस्य द्वे एव मधुरे फले ।
काव्यामृतरसास्वादः संगमः सज्जनैः सह ॥ १४५ ॥
मन्थर उवाच । अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनं ।
मानुष्यं जलविन्दुलोलचपलं फेणोपमं जीवनं ।
धर्मं यो न करोति निश्चलमतिः स्वर्गार्गलोद्घाटनं ।
पश्चात्तापहतो जरापरिणतः शोकाग्निना दह्यते ॥ १४६ ॥

युष्माभिरतिसंचयः कृतः । तत्कृतोऽयं दोषः ।
यतः । उपार्जितानां वित्तानां त्याग एव हि रक्षणं ।
तडागोदरसंस्थानां परीवाह इवाम्भसां ॥ १४७ ॥

अन्यच्च । निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति ।
परार्थं भारवाहीव क्लेशस्यैव हि भाजनं ॥ १४८ ॥

अपरं च । दानोपभोगहीनेन धनेन धनिनो यदि ।
पृथ्वीखातनिखातेन धनेन धनिनो वयं ॥ १४९ ॥
दानभोगविरहिता दिवसा यान्ति यस्य वै ।
स लौहकारभस्त्रेव श्वसन्नपि न जीवति ॥ १५० ॥

अपरं च । धनेन किं यो न ददाति नाश्नुते बलेन किं यश्च रिपून् न बाधते ।
श्रुतेन किं यो न च धर्ममाचरेत् किमात्मना यो न जितेन्द्रियो भवेत् ॥ १५१ ॥

अन्यच्च । असंभोगेन सामान्यं कृपणस्य धनं परैः ।
अस्येदमिति संबन्धो हानौ दुःखेन ज्ञायते ॥ १५२ ॥

अपि च । न देवाय न विप्राय न बन्धुभ्यो न चात्मने ।
कृपणस्य धनं याति वह्नितस्करपार्थिवैः ॥ १५३ ॥

तथा चोक्तं । दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यं ।
त्यागसहितं च वित्तं दुर्लभमेतच्चतुर्भद्रं ॥ १५४ ॥

उक्तं चैतदस्ति । कर्तव्यः संचयो नित्यं कर्तव्यो नातिसंचयः ।
पश्य संचयशीलोऽसौ धनुषा जम्बुको हतः ॥ १५५ ॥

Fab. VII. हिरण्यकोऽब्रवीत् कथमेतत् । मन्थरः कथयति । अस्ति कल्याणकटकवास्तव्यो भैरवो नाम व्याधः । स चैकदा मांसलुब्धः सन् मृगमन्विष्यमाणो धनुरादाय विन्ध्याटवीमध्यं गतः । ततस्तेन व्यापादितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः । तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेण हतः । शूकरेणापि घनघोरगर्जनं कृत्वा मुष्कदेशे हतः स छिन्नद्रुम इव भूमौ पपात ।

यतः । जलमग्निं विषं शस्त्रं क्षुद्व्याधी पतनं गिरेः ।
निमित्तं किंचिदासाद्य देही प्राणैर्विमुच्यते ॥ १५६ ॥

अथ तयोः पादास्फालनेन सर्पो ऽपि मृतः । अत्रान्तरे दीर्घरावो नाम जम्बुकः परिभ्रमन्नाहारार्थी तान् मृतान् मृगव्याधसर्पशूकरान् अवलोकयामास । आलोक्याचिन्तयत् । अहो अद्य महद्भोज्यं मे समुपस्थितं ।

किं च । अचिन्तितानि दुःखानि यथैवायान्ति देहिनां ।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ १५७ ॥

भवतु । एषां मांसैर्मासत्रयं समधिकं भोजनं मे भविष्यति ।

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ १५८ ॥

ततः प्रथमबुभुक्षायां तावदिमानि स्वादूनि मांसानि विहाय कोदण्डाटनीलग्नं स्नायुबन्धं खादामि । इत्युक्त्वा तथाकरोत् । ततश्छिन्ने स्नायुबन्धे द्रुतमुत्पतितेन धनुषा हृदि भिन्नः स दीर्घरावः पञ्चत्वं गतः । अतो ऽहं ब्रवीमि कर्तव्यः संचयो नित्यमित्यादि ।

किं च । यद्ददाति यदश्नाति तदेव धनिनो धनं ।
अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि ॥ १५९ ॥

तथा च । यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत् ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ १६० ॥

इदानीं किमतिक्रान्तोपवर्णनेन ।

यतः । नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुं ।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥ १६१ ॥

तत् सखे सर्वदा त्वया सोत्साहेन भवितव्यं ।

यतः । शास्त्राण्यधीत्यापि भवन्ति मूर्खा यस्तु क्रियावान् पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां न नाममात्रेण करोत्यरोगं ॥ १६२ ॥
अन्यच्च । न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर्गुणं हि ।
अन्धस्य किं हस्ततलस्थितो ऽपि प्रकाशयत्यर्थमिह प्रदीपः ॥ १६३ ॥
तदत्र सखे दशाविशेषे शान्तिः करणीया ।
सुखमापतितं सेवेद्दुःखमापतितं तथा ।
चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च ॥ १६४ ॥
अपि च । निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसंपदः ॥ १६५ ॥
अपरं च । उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वयुक्तं ।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥ १६६ ॥
विशेषतश्च ।
विनाप्यर्थैर्धीरः स्पृशति बहुमानोन्नतिपदं ।
समायुक्तो ऽप्यर्थैः परिभवपदं याति कृपणः ।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां ।
द्युतिं सैंहीं किं श्वा धृतकनकमालो ऽपि लभते ॥ १६७ ॥
किं च । धनवान् इति हि मदस्ते किं गतविभवो विषादमुपयासि ।
करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणां ॥ १६८ ॥
पश्य । अभ्रच्छाया खलप्रीतिर्नवशस्यानि योषितः ।
किंचित्कालोपभोग्यानि यौवनानि धनानि च ॥ १६९ ॥
अन्यच्च । वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता ।
गर्भादुत्पतिते जन्तौ मातुः प्रस्रवतः स्तनौ ॥ १७० ॥

सखे । येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ १७१ ॥

अपरं च सतां रहस्यं शृणु मित्र ।

जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु ।
मोहयन्ति च संपत्तौ कथमर्थाः सुखावहाः ॥ १७२ ॥
धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता ।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरं ॥ १७३ ॥
यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि ।
भक्ष्यते सलिले मत्स्यैस्तथा सर्वत्र वित्तवान् ॥ १७४ ॥
राजतः सलिलादग्नेश्चौरतः स्वजनादपि ।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ १७५ ॥
जन्मनि क्लेशबहुले किंनु दुःखमतः परं ।
इच्छा संपद्यतो नास्ति यच्चेच्छा न निवर्तते ॥ १७६ ॥

अन्यच्च भ्रातःशृणु । धनं तावदसुलभं लब्धं कृच्छ्रेण पाल्यते ।
लब्धनाशो यथा मृत्युस्तस्मादेतन्न चिन्तयेत् ॥ १७७ ॥
तृष्णा हि चेत् परित्यक्ता को दरिद्रः क ईश्वरः ।
तस्याश्चेत् प्रसरो दत्तो दास्यं च शिरसि स्थितं ॥ १७८ ॥
यद्यदेव हि वाञ्छेत ततो वाञ्छा प्रवर्तते ।
प्राप्त एवार्थतः सोऽर्थो यतो वाञ्छा निवर्तते ॥ १७९ ॥

किं बहुना । मम पक्षपातान्मयैव सहात्र कालो नीयतां ।

यतः । आमरणान्ताः प्रणयाः कोपास्तत्क्षणभंगुराः ।
परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनां ॥ १८० ॥

इति श्रुत्वा लघुपतनको ब्रूते। धन्योऽसि मन्थर सर्वदाश्रयणीयोऽसि ।

यतः । सन्त एव सतां नित्यमापदुद्धरणक्षमाः ।
गजानां पङ्कमग्नानां गजा एव धुरंधराः ॥ १८१ ॥

तथा च । गुणिनि गुणज्ञो रमते नागुणशीलस्य गुणिनि परितोषः ।
अलिरेति वनात् कमलं न हि भेकस्त्वेकवासोऽपि ॥१८२॥

अपरं च । श्लाघ्यः स एको भुवि मानवानां स उत्तमः सत्पुरुषः स धन्यः ।
यस्यार्थिनो वा शरणागता वा नाशाविभङ्गा विमुखाः प्रयान्ति ॥

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः संतुष्टाः सुखं निवसन्ति । अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः । ततः पश्चादायान्तं भयहेतुमाकलय्य मन्थरो जलं प्रविष्टो मूषिकश्च विवरं गत उड्डीयमानः काको वृक्षाग्रमारूढः । ततो लघुपतनकेन सुदूरं निरूप्य भयहेतुर्न कोऽप्यवलोकितः। पश्चादागत्य पुनः सर्वे मिलित्वोपविष्टाः। मन्थरेणोक्तं भद्र मृग कुशलं ते । स्वेच्छयोदकाद्याहारोऽनुभूयतां । अत्रावस्थानेन वनमिदं सनाथीक्रियतां। चित्राङ्गो ब्रूते। लुब्धकत्रासितोऽहं भवतां शरणमागतः।

यतः । लोभाद्वाथ भयाद्वापि संत्यजेच्छरणागतं ।
ब्रह्महत्यासमं तस्य पापमाहुर्मनीषिणः ॥ १८४ ॥

ततश्च भवद्भिः सह मित्रत्वमिच्छामि । हिरण्यकोऽवदत् । मित्रत्वं तावदस्माभिः सहायत्नेन निष्पन्नमेव भवतः ।

यतः । औरसं कृतसंबन्धं तथा वंशक्रमागतं ।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधं ॥ १८५ ॥

तदत्र स्वगृहनिर्विशेषेण स्थीयतां। तच्छ्रुत्वा मृगः सानन्दः कृतस्वेच्छाहारः पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः ।

यतः । कूपोदकं वटच्छाया श्यामा स्त्री इष्टकागृहं ।
शीतकाले भवेदुष्णमुष्णकाले च शीतलं ॥ १८६ ॥

अथ मन्थरो ब्रूते । सखे मृग केन त्रासितोऽसि । अस्मिन्निर्जने वने कदाचित् किं व्याधाः संचरन्ति । मृगेणोक्तं । अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नृपतिः । स च दिग्विजयक्रमेणागत्य चन्द्रभागातीरे समावासितकटको वर्तते । प्रातश्च तेनात्रागत्य कर्पूरसरःसमीपे भवितव्यं । इति व्याधानां मुखात् किंवदन्ती श्रूयते । तदत्रापि प्रातरवस्थानं भयहेतुकमित्यवगम्य यथा कार्यं तथारभ्यतां । तच्छ्रुत्वा कूर्मः सभयमाह । जलाशयान्तरं गच्छामि । काकमृगावप्युक्तवन्तावेवमस्तु । हिरण्यको विमृश्याब्रवीत् । पुनर्जलाशये प्राप्ते मन्थरस्य कुशलं । स्थले गच्छतः कः प्रतीकारः ।

यतः ।

अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनां ।
स्वभूमिश्च पदातीनां राज्ञां सैन्यं परं बलं ॥ १८७ ॥

सखे लघुपतनक अनेनोपदेशेन तथा भविष्यति ।

स्वयं वीक्ष्य यथा बध्वाः पीडितं स्तनकुड्मलं ।
बणिक्पुत्रोऽभवद्दुःखी त्वं तथैव भविष्यसि ॥ १८८ ॥

Fab. VIII. त ऊचुः कथमेतत् । हिरण्यकः कथयति । अस्ति कान्यकुब्जविषये राजा वीरसेनो नाम । तेन वीरपुरनाम्नि नगरे तुङ्गबलो नाम राजपुत्रो भोगपतिः कृतः । स च महाधनस्तरुणः स्वनगरे भ्राम्यन्नतिप्रौढयौवनां लावण्यवतीं नाम बणिक्पुत्रबधूमालोकयामास । ततः स्वहर्म्यं गत्वा स्मराकुलितमतिस्तस्याः कृते दूतीं प्रेषितवान् । सापि लावण्यवती तदवलोकनक्षणात् प्रभृति स्मरशरप्रहारजर्जितहृदया तदेकचित्ताभवत् ।

तथा ह्युक्तं । न स्त्रीणामप्रियः कश्चित् प्रियो वापि न विद्यते ।
गावस्तृणमिवारण्ये प्रार्थयन्ति नवं नवं ॥ १८९ ॥

अथ दूतीवचनं श्रुत्वा लावण्यवत्युवाच । अहं पतिव्रता परपुरुषस्पर्शमात्रमपि न करोमि ।

यतः । सा भार्या या गृहे दक्षा सा भार्या या प्रजावती ।
सा भार्या या पतिप्राणा सा भार्या या पतिव्रता ॥ १९० ॥
न सा भार्येति विख्याता यस्यां भर्ता न तुष्यति ।
अग्निसाक्षिकमर्यादो भर्ता हि शरणं स्त्रियाः ॥ १९१ ॥

ततो यद्यदादिशति मे प्राणेश्वरस्तत्तदेवाहमविचारितं करोमि । दूत्योक्तं सत्यमेतत् । लावण्यवत्युवाच सत्यमेवैतत् । तत् सर्वमेव दूत्या गत्वा तुङ्गबलस्य निवेदितं । तच्छ्रुत्वा तुङ्गबलोऽवदत् । स्वामिनानीय समर्पयितव्येति कथमेतच्छक्यं । कुट्टन्याह । उपायः क्रियतां ।

तथा चोक्तं ।

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
शृगालेन हतो हस्ती गच्छता पङ्कवर्त्मना ॥ १९२ ॥

Fab. IX. राजपुत्रः पृच्छति कथमेतत् । सा कथयति । अस्ति ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती । तमवलोक्य सर्वे शृगालाश्चिन्तयन्ति । यद्ययं केनाप्युपायेन मार्यते तदास्माकमेतद्देहेन मासचतुष्टयस्य स्वेच्छाभोजनं भविष्यति । तत एकेन वृद्धशृगालेन प्रतिज्ञातं । मया बुद्धिप्रभावादेतन्मरणं साधयितव्यं । अनन्तरं स वञ्चकः कर्पूरतिलकसकाशं गत्वा साष्टाङ्गपातं प्रणम्योवाच । देव दृष्टिप्रसादं कुरु । हस्ती ब्रूते कस्त्वं कुतः समायातः । सोऽवदत् । जम्बुकोऽहं सर्वैर्वनवासिभिर्मिलित्वा भवत्सकाशं प्रस्थापितः । यद्विना

राज्ञावस्थातुं न युक्तं। तदत्राटवीराज्ये ऽभिषेक्तुं भवान् सर्वस्वामिगुणोपेतो निरूपितः ।

यतः । यः कुलाभिजनाचारैरतिशुद्धः प्रतापवान् ।
धार्मिको नीतिकुशलः स स्वामी युज्यते भुवि ॥ ११३ ॥

अपरं च पश्य । राजानं प्रथमं विन्देत् ततो भार्यां ततो धनं ।
राजन्यसति लोके ऽस्मिन् कुतो भार्या कुतो धनं ॥ ११४ ॥

अन्यच्च । पर्जन्य इव भूतानामाधारः पृथिवीपतिः ।
विकले ऽपि हि पर्जन्ये जीव्यते न तु भूपतौ ॥ ११५ ॥

किं च । नियतविषयवर्ती प्रायशो दण्डयोगाज्-
जगति परवशे ऽस्मिन् दुर्लभः साधुवृत्तः ।
कृशमतिविकलं वा व्याधितं वाधनं वा ।
पतिमपि कुलनारी दण्डभीत्याभ्युपैति ॥ ११६ ॥

तद्यथा लग्नवेला न चलति तथा कृत्वा सत्वरमागम्यतां देवेन । इत्युक्त्वोत्थाय चलितः । ततो ऽसौ राज्यलोभाकृष्टः कर्पूरतिलकः शृगालवर्त्मना धावन् महापङ्के निमग्नः । हस्तिनोक्तं । सखे शृगाल किमधुना विधेयं महापङ्के पतितो ऽहं। शृगालेन विहस्योक्तं। देव मम पुच्छे करावलम्बनं कृत्वोत्तिष्ठ । यस्य वचसि त्वया विश्वासः कृतस्तस्य फलमेतत् ।

तथा ह्युक्तं । यदि सत्संगरहितो भविष्यसि भविष्यसि ।
तदासज्जनगोष्ठीषु पतिष्यसि पतिष्यसि ॥ ११७ ॥

ततो महापङ्कनिमग्नो हस्ती शृगालैर्भक्षितः । अतो ऽहं ब्रवीमि उपायेन हि यच्छक्यमित्यादि । ततः कुट्टन्युपदेशेन तं चारुदत्तनामानं वणिक्पुत्रं स राजपुत्रः सेवकं चकार । ततो ऽसौ तेन सर्वविश्वासकार्येषु नियुज्यते ।

एकदा तेन राजपुत्रेण स्नातानुलिप्तेन कनकालंकारधारिणोक्तं । मया मासमेकं यावद्गौरीव्रतं कर्तव्यं । तदद्यारभ्य प्रतिरात्रमेकामेकां कुलीनां युवतीमानीय समर्पय । सा मया यथोचितेन विधिना पूजयितव्या । ततः स चारुदत्तस्तथाविधां तरुणीमानीय समर्प्य पश्चात् प्रच्छन्नः किमयं करोतीति निरूपयति । स च तुङ्गबलस्तां युवतीमस्पृशन्नेव वस्त्रालंकारैः संपूज्य रक्षकं दत्त्वा तत्क्षणं प्रस्थापयति । अथ बणिक्पुत्रेण तद्दृष्ट्वोपजातविश्वासेन लोभाकृष्टचेतसा स्वबधूरानीय समर्पिता । स च राजपुत्रस्तां हृदयप्रियां लावण्यवतीं परिज्ञाय ससंभ्रममुत्थाय निर्दयमालिङ्ग्यानन्दनिमीलितलोचनः पर्यङ्के तया सह विललास । तदालोक्य बणिक्पुत्रश्चित्रलिखित इव इतिकर्तव्यतामूढः परं विषादमगमत् । अतोऽहं ब्रवीमि स्वयं वीक्ष्य यथा बधा इत्यादि । तथा त्वयापि भवितव्यं । ततस्तद्धितवचनमवधीर्य महता भयेन मुषित इव मन्थरो जलाशयमुत्सृज्य चलितः । तेऽपि हिरण्यकादयस्तमनुगच्छन्ति । ततः स्थले गच्छन् केनापि व्याधेन वनं पर्यटता स मन्थरः प्राप्तः । प्राप्य च तं गृहीत्वोत्थाप्य धनुषि बद्ध्वा घर्माकुलः स्वगृहाभिमुखं प्रयातः । अथ ते मृगवायसमूषिकाः परं विषादमुपगतवन्तस्तमनुजग्मुः । तत्र हिरण्यको विलपति ।

एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य ।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ।।१९८।।
स्वभावजं तु यन्मित्रं भाग्येनैवाभिजायते ।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ।। १९९ ।।
न मातरि न दारेषु न सोदर्ये न चात्मजे ।
विश्वासस्तादृशः पुंसां यादृङ्मित्रे स्वभावजे ।। २०० ।।

मुहुर्विचिन्त्य अहो मे दुर्दैवं ।

स्वकर्मसंतानविचेष्टितानि कालान्तरावर्तिशुभाशुभानि ।
इहैव दृष्टानि मयैव तानि जन्मान्तराणीव दशान्तराणि ॥ २०१ ॥

अथ वा । कायः संनिहितापायः संपदः पदमापदां ।
समागमाः सापगमाः सर्वमुत्पादि भंगुरं ॥ २०२ ॥

पुनर्विमृश्याह । शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनं ।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयं ॥ २०३ ॥

किं च । मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः ।
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभं ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुलास् ।
ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥ २०४ ॥

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह । यावदेवायं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियतां । तावूचतुः सत्वरं कार्यमुच्यतां । हिरण्यको ब्रूते । चित्राङ्गो जलसमीपं गत्वा मृतमिवात्मानं निश्चेष्टं दर्शयतु काकश्च तस्योपरि चञ्च्वा किमपि लिखतु । नूनमनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यं । ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि । अथ चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः श्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टस्तथाविधं मृगमपश्यत् । ततः कर्तरिकामादाय प्रहृष्टमना मृगान्तिकं चलितः । अत्रान्तरे हिरण्यकेनागत्य छिन्नबन्धनः स कूर्मः सत्वरं जलाशयं प्रविवेश । स मृग आसन्नं तं व्याधमवलोक्योत्थाय पलायितः । प्रत्यावृत्य यावदसौ लुब्धकस्तरुतलमायाति तावत् कूर्ममपश्यन्नचिन्तयत् । उचितमेवैतत् ममासमीक्ष्यकारिणः ।

यतः । यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव च ॥ २०५ ॥

ततोऽसौ स्वकर्मवशान्निराशः कटकं प्रविष्टः ।

कर्तव्यानि च मित्राणि दुर्बलाणि बलानि च ।
पश्य कूर्मपतिर्बद्धो मूषिकेण विमोचितः ॥ २०६ ॥

मन्थरादयः सर्वे मुक्तव्यापदः स्वस्थानं गत्वा यथासुखमास्थिताः । अथ राजपुत्रैः सानन्दमुक्तं । सर्वं श्रुतवन्तः सुखिनो वयं । सिद्धं नः समीहितं । विष्णुशर्मोवाच । एतावद्भवतामभिलषितं संपन्नं । अपरमपीदमस्तु ।

मित्रं प्राप्नुत सज्जना जनपदे लक्ष्मीः समालम्बतां ।
भूपालाः परिपालयन्तु वसुधां शश्वत् स्वधर्मे स्थिताः ।
आस्तां मानसतुष्टये सुकृतिनां नीतिर्नवोढेव वः ।
कल्याणं कुरुतां जनस्य भगवांश्चन्द्रार्द्धचूडामणिः ॥ २०७ ॥

इति हितोपदेशे मित्रलाभो नाम
प्रथमकथासंग्रहः
समाप्तः ॥

LIBER SECUNDUS.

अथ राजपुत्रा ऊचुः । आर्य मित्रलाभस्तावदस्माभिः श्रुतः । इदानीं सुहृद्भेदं श्रोतुमिच्छामः । विष्णुशर्मोवाच । सुहृद्भेदं शृणुत यस्यायमाद्यः श्लोकः ।

वर्धमानो महास्नेहो मृगेन्द्रवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ १ ॥

Fab. I. राजपुत्रैरुक्तं कथमेतत् । विष्णुशर्मा कथयति । अस्ति दक्षिणापथे सुवर्णवती नाम नगरी । तत्र महाधनो वर्धमानो नाम बणिग्विवसति । तस्य प्रभूतेऽपि वित्तेऽपरान् बन्धून् अतिसमृद्धान् अवलोक्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव ।

यतः । अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ २ ॥

अन्यच्च । अव्यवसायिनमलसं दैवपरं साहसाच्च परिहीणं ।
प्रमदेव हि वृद्धपतिं नेच्छत्युपग्रहितुं लक्ष्मीः ॥ ३ ॥

किं च । आलस्यं स्त्रीसेवा सरोगिता जन्मभूमिवात्सल्यं ।
संतोषो भीरुत्वं षड् व्याघाता महत्त्वस्य ॥ ४ ॥

यतः । संपदा सुस्थितमना भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य तां ॥ ५ ॥

अपरं च । निरुत्साहं निरानन्दं निर्वीर्यमरिनन्दनं ।
मास्म सीमन्तिनी काचित् जनयेत् पुत्रमीदृशं ॥ ६ ॥

तथा चोक्तं ।

अलब्धं चैव लिप्सेत लब्धं रक्षेदपेक्षया ।
रक्षितं वर्धयेत् सम्यग्वृद्धं तीर्थेषु निक्षिपेत् ॥ ७ ॥

यतः । अलब्धमलिप्सतोऽनुद्योगादर्थस्य नाप्तिरेवास्ति ।
लब्धस्यारक्षितस्य धनस्य भवति स्वयं नाशः ॥ ८ ॥

अवर्धमानश्चार्थः स्वल्पव्ययोऽप्यञ्जनवत् क्षयमेति ।

अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य तु संचयं ।
अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु ॥ ९ ॥

अन्यच्च । जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥ १० ॥

इति संचिन्त्य संजीवकनन्दकनामानौ द्वौ वृषभौ धुरि नियोज्य शकटं नानाविधद्रव्यपूर्णं कृत्वा वाणिज्येन काश्मीरं प्रचलितः ।

यतः । कोऽतिभारः समर्थानां किं दूरं व्यवसायिनां ।
को विदेशः सविद्यानां कः परः प्रियवादिनां ॥ ११ ॥

ततो गच्छतस्तस्य सुदुर्गनाम्नि पर्वते महारण्ये संजीवको भग्नजानुर्निपतितः । तमालोक्य वर्धमानोऽचिन्तयत् ।

करोतु नाम नीतिज्ञो व्यवसायमितस्ततः ।
फलं पुनस्तदेवास्य यद्विधेर्मनसि स्थितं ॥ १२ ॥

किं च । विस्मयः सर्वथा हेयः प्रत्यूहः सर्वकर्मणां ।
तस्माद्विस्मयमुत्सृज्य साध्ये सिद्धिर्विधीयतां ॥ १३ ॥

इति संचिन्त्य संजीवकं तत्र परित्यज्य वर्धमानः सुवर्णपुरं नाम नगरं गत्वा महाकायमन्यवृषभं समानीय धुरि नियोज्य पुनश्चलितः। संजीवकः कथमपि खुरत्रयेण भरं कृत्वोत्थितः।

यतः। निमग्नस्य पयोराशौ पर्वतात् पतितस्य च।
तक्षकेणापि दष्टस्य आयुर्मर्माणि रक्षति॥ १४॥

अपरं च। निपततु शिखराद्रेर्मज्जतु जलधौ हुताशनं विशतु।
क्रीडतु भुजंगमैरपि नाकाले कस्यचिन्नाशः॥ १५॥

अपरं च। नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि।
कुशाग्रेणैव संस्पृष्टः प्राप्तकालो न जीवति॥ १६॥

अरक्षितं तिष्ठति दैवरक्षितं सुरक्षितं दैवहतं विनश्यति।
जीवत्यनाथोऽपि वने विसर्जितः कृतप्रयत्नोऽपि गृहे न जीवति॥

ततो दिनेषु गच्छत्सु संजीवकः स्वेच्छाहारादिलाभेनारण्यानीं भ्राम्यन् हृष्टपुष्टाङ्गो बलवान् ननाद। तस्मिन् वने च पिङ्गलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनुभवन्नास्ते।

तथा चोक्तं। नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः।
विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता॥ १८॥

स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छमगमत्। तेन च तत्र सिंहेनाननुभूतपूर्वकं प्रलयघनगर्जितमिव संजीवकनर्दितमश्रावि। तच्छ्रुत्वासौ पानीयमपीत्वा सचकितं परावृत्य स्वस्थानमागत्य किमिदमित्यालोच्य तूष्णीं स्थितः। स तथाविधः करटकदमनकाभ्यामस्य मन्त्रिपुत्राभ्यां शृगालाभ्यामवलोकितः। तद्दृष्ट्वा दमनकः करटकमाह सखे करटक किमित्ययमुदकार्थी स्वामी पानीयमपीत्वा मन्दं मन्दमवतिष्ठते। करटको ब्रूते। मित्र

दमनक मम संमतेनास्य सेवैव न क्रियते । तत् किमस्य चेष्टानिरूपणेन । यतोऽनेन राज्ञा चिरमवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतं ।

सेवया धनमिच्छद्भिः सेवकैः पश्य यत् कृतं ।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितं ॥ १९ ॥
शीतवातातपक्लेशान् सहन्ते यान् पराश्रिताः ।
तदंशेनापि मेधावी तपस्तप्त्वा सुखी भवेत् ॥ २० ॥
एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।
ये पराधीनतां यातास्ते वै जीवन्ति के मृताः ॥ २१ ॥
एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥ २२ ॥
अबुधैरर्थलाभाय पण्यस्त्रीभिरिव स्वयं ।
आत्मा संस्कृत्य संस्कृत्य परोपकरणीकृतः ॥ २३ ॥
या प्रकृत्यैव चपला निपतत्यशुचावपि ।
स्वामिनो बहु मन्यन्ते दृष्टिं तामपि सेवकाः ॥ २४ ॥

विशेषतश्च ।

प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥ २५ ॥

अपरं च । मौनान्मूर्खः प्रवचनपटुर्वातुलो जल्पको वा ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः ।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ २६ ॥

दमनकोऽब्रवीत् । मित्र सर्वथा मनसापि नैतत् कर्तव्यं ।

कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ २७ ॥

अन्यच्च । कुतः सेवाविहीनानां चामरोद्धूतसंपदः ।
उद्दण्डधवलच्छत्रवाजिवारणवाहनाः ॥ २८ ॥

करटको ब्रूते । तथापि किमनेन व्यापारेणास्माकं । अव्यापारेषु व्यापारः सर्वथा परिहरणीयः ।

पश्य । अव्यापारेषु व्यापारं यो नरः कर्तुमिच्छति ।
स भूमौ निहतः शेते कीलोत्पाटीव वानरः ॥ २९ ॥

Fab. II. दमनकः पृच्छति कथमेतत् । स कथयति । अस्ति मगधदेशे धर्मारण्यसंनिहितवसुधायां शुभदत्तनामा कायस्थः । तेन विहारः कारयितुमारब्धः । तत्र करपत्रविदार्यमाणस्तम्भस्य कियद्दूरस्फाटितस्य काष्ठखण्डद्वयमध्ये कीलकः सूत्रधारेण स्थापितः । तत्र सायाह्ने वनवासी वानरयूथः क्रीडन्नागतः । तेष्वेको वानरः कालदण्डप्रेरित इव तं कीलकं हस्ताभ्यां धृत्वोपविष्टः । ततस्तस्य मुष्कद्वयं लम्बमानं काष्ठखण्डद्वयाभ्यन्तरे प्रविष्टं । अनन्तरं स च सहजचपलतया महता प्रयत्नेन तं कीलकमाकृष्टवान् । आकृष्टे सति काष्ठाभ्यां चूर्णिताण्डद्वयः पञ्चत्वं गतः । अतोऽहं ब्रवीमि अव्यापारेषु व्यापारमित्यादि । दमनको ब्रूते । तथापि स्वामिचेष्टानिरूपणं सेवकेनावश्यमेव कर्तव्यं । करटको ब्रूते । यः सर्वाधिकारे नियुक्तः प्रधानमन्त्री स करोतु । यतोऽनुजीविना पराधिकारचर्चा न कर्तव्या ।

पश्य । पराधिकारचर्चां यः कुर्यात् स्वामिहितेच्छया ।
स विषीदति चीत्कारात् ताडितो गर्दभो यथा ॥ ३० ॥

Fab. III. दमनकः पृच्छति कथमेतत् । करटकः कथयति । अस्ति वाराणस्यां कर्पूरपटो

नाम रजकः । स चैकदाभिनववयस्कया कान्तया सह चिरात् केलिं कृत्वा निर्भरं प्रसुप्तः । तदनन्तरं द्रव्याणि हर्तुं तद्गृहं चौरः प्रविष्टः । तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति कुक्कुरश्चोपविष्टः । अथ गर्दभः श्वानमाह । तव तावदयं व्यापारः । तत् किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं कथं न जागरयसि । कुक्कुरो ब्रूते । मम नियोगस्य चर्चा किं त्वया कर्तव्या । त्वमेव जानासि यथाहमेतस्याहर्निशं गृहरक्षां करोमि । ततोऽयं चिरान्निर्वृतो ममोपयोगं न जानाति । तेनाधुना ममाहारदानेऽपि मन्दादरः । यतो विना विधुरदर्शनं स्वामिनोऽनुजीविषु मन्दादरा भवन्ति । गर्दभो ब्रूते शृणु रे बर्बर ।

याचते कार्यकाले यः स किं भृत्यः स किं सुहृत् ।

कुक्कुरो ब्रूते । यो न संभावयेद्भृत्यान् कार्यकाले स किं प्रभुः ॥ ३१ ॥

यतः । आश्रितानां भृतौ स्वामिसेवायां धर्मसेवने ।
पुत्रस्योत्पादने चैव न सन्ति प्रतिहस्तकाः ॥ ३२ ॥

ततो गर्दभः सकोपमाह । पापीयांस्त्वं यद्विपत्तौ स्वामिकार्योपेक्षां करोषि । भवतु । यथा स्वामी जागर्ति तथा मया कर्तव्यं ।

यतः । पृष्ठतः सेवयेदर्कं जठरेण हुताशनं ।
स्वामिनं सर्वभावेन परलोकममायया ॥ ३३ ॥

इत्युक्त्वा स चीत्कारशब्दं कृतवान् । ततः स रजकस्तेन चीत्कारेण प्रबुद्धो निद्राविमर्दकोपादुत्थाय गर्दभं लगुडेन ताडयामास । अतोऽहं ब्रवीमि पराधिकारचर्चामित्यादि । पश्य । पशूनामन्वेषणमस्मन्नियोगः स्वनियोगचर्चा क्रियतां । किंत्वद्य तयापि न प्रयोजनं । यत आवयोर्भक्षितशेषाहारः प्रचुरस्तिष्ठति । दमनकः सरोषमाह । कथमाहारमात्रार्थी भवान् नृपं सेवते । एतन्न युक्तं ।

यतः । सुहृदामुपकारकारणात् द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलं ॥ ३४ ॥
अपि च । यस्मिन् जीवति जीवन्ति बहवः स तु जीवतु ।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणं ॥ ३५ ॥
पश्य । पञ्चभिर्याति दासत्वं पुराणैः कोऽपि मानवः ।
कोऽपि लक्षैः कृती कोऽपि लक्षैरपि न लभ्यते ॥ ३६ ॥
अन्यच्च । मनुष्यजातौ तुल्यायां भृत्यत्वमतिगर्हितं ।
प्रथमो यो न तत्रापि स किं जीवत्सु गण्यते ॥ ३७ ॥
तथा ह्युक्तं । वाजिवारणलौहानां काष्ठपाषाणवाससां ।
नारीपुरुषतोयानामन्तरं महदन्तरं ॥ ३८ ॥
तथा च । अल्पस्नायु वसावसेकमलिनं निर्मांसमप्यस्थिकं ।
श्वा लब्ध्वा परितोषमेति न भवेत् तस्य क्षुधः शान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं ।
सर्वः कृच्छ्रगतोऽपि वाञ्छति जनः सत्त्वानुरूपं फलं ॥ ३९ ॥
अपरं च पश्य सेव्यसेवकयोरन्तरं ।
लांगूलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुंगवस्तु धीरं विलोकयति चाटुशतैश्च भुंक्ते ॥
किं च । यज्जीव्यते क्षणमपि प्रथितं मनुष्यैर्विज्ञानविक्रमयशोभिरभग्नमानं ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः काकोऽपि जीवति चिराय बलिं च भुंक्ते
अपरं च । अहितहितविचारशून्यबुद्धेः श्रुतिविषयैर्बहुभिर्बहिष्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः पुरुषपशोश्च पशोश्च को विशेषः ॥ ४२ ॥
करटको ब्रूते । आवां तावदप्रधानौ । तथा सत्यावयोः किमनया विचारणया ।

दमनकः पुनराह । कियता कालेनामात्यः प्रधानतामप्रधानतां वा लभेत । यतः ।

न कस्यचित् कश्चिदिह स्वभावाद्भवत्युदारो ऽभिमतः खलो वा ।
लोके गुरुत्वं विपरीततां वा स्वचेष्टितान्येव नरं नयन्ति ॥ ४३ ॥

किं च । आरोप्यते शिला शैले यत्नेन महता यथा ।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः ॥ ४४ ॥
यात्यधो ऽधो व्रजत्युच्चैर्नरः स्वैरेव कर्मभिः ।
कूपस्य खनिता यद्वत् प्राकारस्येव कारकः ॥ ४५ ॥

तद्भद्र स्वयत्नायत्तो ह्यात्मोत्कर्षः। करटको वदति । अथ भवान् किं ब्रवीति । दमनक आह । अयं तावत् स्वामी पिङ्गलकः कुतो ऽपि भयात् सचकितं परिवृत्योपविष्टः । करटको ब्रूते किं तत्त्वं जानासि । दमनको वदति किं प्रज्ञावतामविदितमस्ति ।

उक्तं च ।

उदीरितो ऽर्थः पशुनापि बुध्यते हयाश्च नागाश्च वहन्ति देशिताः ।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ॥ ४६ ॥

तदत्र भयप्रस्तावे ऽहमेनं प्रज्ञाबलेनात्मीयं करिष्यामि ।

यतः । प्रस्तावसदृशं वाक्यं सद्भावसदृशं प्रियं ।
आत्मशक्तिसमं कोपं यो जानाति स पण्डितः ॥ ४७ ॥

करटको वदति सखे त्वं सेवानभिज्ञः ।

यतः । विशति यस्त्वनाहूतो यो ऽपृष्टो बहु भाषते ।
आत्मानं मन्यते प्रीतं भूपालस्य स दुर्मतिः ॥ ४८ ॥

दमनको ब्रूते भद्र कथमहं सेवानभिज्ञः ।

पश्य । किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरं ।
यदेव रोचते यस्मै भवेत् तत् तस्य सुन्दरं ॥ ४९ ॥
यतः । यस्य यस्य हि यो भावस्तेन तेन हि तं नरं ।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत् ॥ ५० ॥
अन्यच्च । कोऽत्रेत्यहमिति ब्रूयात् सम्यगादेशयेति च ।
आज्ञामवितथं कुर्याद्यथाशक्ति महीपतेः ॥ ५१ ॥
आज्ञाभङ्गो नरेन्द्राणां ब्राह्मणानामनादरः ।
पृथक् शय्या च नारीणामशस्त्रविहितो बधः ॥ ५२ ॥
अपरं च । अल्पेच्छुर्धृतिमान् प्राज्ञश्छायेवानुगतः सदा ।
आदिष्टो न विकल्पेत स राजवसतिं वसेत् ॥ ५३ ॥

करटको ब्रूते । कदाचित् त्वामनवसरप्रवेशादवमन्यते स्वामी । दमनकोऽब्रवीत् । अस्त्येवं । तथाप्यनुजीविना सान्निध्यमवश्यं करणीयं ।

यतः । दोषभीतेरनारम्भः कापुरुषस्य लक्षणं ।
कैरजीर्णभयाद्भ्रातर्भोजनं परिहीयते ॥ ५४ ॥

पश्य ।

आसन्नमेव नृपतिर्भजते मनुष्यं विद्याविहीनमकुलीनमसंस्कृतं वा ।
प्रायेण भूमिपतयः प्रमदा लताश्च यः पार्श्वतो भवति तं परिवेष्टयन्ति ॥

करटको ब्रूते । अथ तत्र गत्वा किं वक्ष्यसि । स आह । शृणु किमनुरक्तो विरक्तो वापि मयि स्वामीति ज्ञास्यामि । करटको वदति । किं तज्ज्ञानलक्षणं । दमनको ब्रूते । शृणु ।

दूरादवेक्षणं हासः संप्रश्नेष्वादरो भृशं ।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु ॥ ५६ ॥

तत्सेवके ऽप्यनुरक्तिर्दानं प्रीतिविवर्धनं ।
अनुरक्तेशचिह्नानि दोषे ऽपि गुणसंग्रहः ॥ ५७ ॥
कालयापनमाशानां वर्धनं फलखण्डनं ।
विरक्तेश्वरचिह्नानि जानीयान्मतिमान् नरः ॥ ५८ ॥

एतज्ज्ञात्वा यथायं ममायत्तो भवति तद्वक्ष्यामि ।

यतः । अपायसंदर्शनजां विपत्तिमुपायसंदर्शनजां च सिद्धिं ।
मेधाविनो नीतिविधिप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति ॥ ५९ ॥

करटको ब्रूते । तथाप्यप्राप्ते प्रस्तावे न वक्तुमर्हसि ।

यतः । अप्राप्तकालवचनं बृहस्पतिरपि ब्रुवन् ।
प्राप्नुयाद्बुद्ध्यवज्ञानमपमानं च शाश्वतं ॥ ६० ॥

दमनको ऽब्रवीत् । मित्र मा भैषीः । नाहमप्राप्तावसरं वचनं वक्ष्यामि ।

यतः । आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
अपृष्टेनापि वक्तव्यं भृत्येन हितमिच्छता ॥ ६१ ॥

यदि प्राप्तावसरेण मया मन्त्रो न वक्तव्यस्तदा मन्त्रित्वमेव ममानुपपन्नं ।

यतः । कल्पयति येन वृत्तिं येन च लोके प्रशस्यते सद्भिः ।
स गुणस्तेन च गुणिना रक्ष्यः संवर्धनीयश्च ॥ ६२ ॥

तद्भद्रानुजानीहि मां गच्छामि । करटको ब्रूते । शुभमस्तु यथाभिप्रेतमनुष्ठीयतां । ततो दमनकः सविस्मय इव पिङ्गलकसमीपं गतः । अथ दूरादेव राज्ञा दृष्टः सादरं प्रवेशितः । साष्टाङ्गपातं प्रणिपत्योपविष्टः । राजाह । चिराद्दृष्टो ऽसि । दमनको ब्रूते । न किंचित् श्रीमद्देवपादानां मया सेवकेन प्रयोजनमस्ति । तथापि प्राप्तकालमनुजीविना सान्निध्यमवश्यं कर्तव्यमित्यागतो ऽस्मि ।

यतः ।

यैश्चाहवेषु शतशस्त्रनिपातभिन्ना मातङ्गतुङ्गसुरभिः सततार्जिता भूः ।
तेषामपि प्रभुसमीपमुपागतानां वाचःस्खलन्ति गुरुसाध्वसभावभिन्नाः ॥
अपरं च । राजनि विदुषां मध्ये वरसुरतानां समागमे स्त्रीणां ।
साध्वसदूषितहृदयो वाक्पटुरपि कातरो भवति ॥ ६४ ॥
इह हि केनचिदपि हेतुकेन प्रयोजनमस्ति ।
तथा चोक्तं । दन्तस्य निर्घर्षणकेन राजन् कर्णस्य कण्डूयनकेन वापि ।
तृणेन कार्यं भवतीश्वराणां किमङ्गवाक्पाणिमता नरेण ॥ ६५ ॥
यद्यपि स्वामिना चिरेणावधीरितस्य मे बुद्धिविनाशः शङ्क्यते तदपि न ।
कदार्थितस्यापि हि धैर्यवृत्तेर्बुद्धेर्विनाशो न हि शङ्कनीयः ।
अधः कृतस्यापि तनूनपादो नाधः शिखा याति कदाचिदेव ॥ ६६ ॥
मणिर्लुठति पादेषु काचः शिरसि धार्यते ।
यथैवास्ति तथैवास्तु काचः काचो मणिर्मणिः ॥ ६७ ॥
देव सर्वथा सविशेषेण स्वामिना भवितव्यं ।
यतः । निर्विशेषो यदा राजा समः सर्वेषु वर्तते ।
तदोद्यमसमर्थानामुत्साहः परिहीयते ॥ ६८ ॥
किं च । त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ।
नियोजयेत् तथैवैतांस्त्रिविधेष्वेव कर्मसु ॥ ६९ ॥
स्थान एव नियोज्यन्ते भृत्याश्चाभरणानि च ।
न हि चूडामणिः पादे नूपुरो न च मूर्धनि ॥ ७० ॥
अपि च ।
कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते ।
न स विरौति न चापि विशोभते भवति योजयितुर्वचनीयता ॥ ७१ ॥

पश्य । बुद्धिमान् अनुरक्तो ऽयमिहोभयगुणो जनः ।
इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः ॥ ७२ ॥

तथा हि । अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्य हि भवन्ति योग्या अयोग्याश्च ॥ ७३ ॥

अन्यच्च । किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन् नावज्ञातुं त्वमर्हसि ॥ ७४ ॥

यतः । अवज्ञानाद्राज्ञो भवति मतिहीनः परिजनस्- ।
ततस्तत्प्राधान्याद्वसति न समीपे बुधजनः ।
बुधैस्त्यक्ते राज्ये न हि भवति नीतिर्गुणवती ।
विपन्नायां नीतौ सकलमवशं सीदति जगत् ॥ ७५ ॥

अपरं च । जनं जनपदा नित्यमर्चयन्ति नृपार्चितं ।
नृपेणावमतो यस्तु स सर्वैरवमन्यते ॥ ७६ ॥

किं च । बालादपि गृहीतव्यं युक्तमुक्तं मनीषिभिः ।
रवेरविषये किं न प्रदीपस्य प्रकाशनं ॥ ७७ ॥

पिङ्गलको ऽब्रवीत् । भद्र दमनक किमेतत् । त्वमस्माकं प्रधानामात्यपुत्रः कियन्तं कालं कुतश्चित् पिशुनवचनात् कुपितो नागतो ऽसि । इदानीं यथाभिमतं ब्रूहि । दमनको ब्रूते । देव पृच्छामि किंचित् तदुच्यतां । उदकार्थी स्वामी पानीयमपीत्वा किं विस्मित इव तिष्ठति । पिङ्गलको ऽवदत् । भद्रमुक्तं त्वया किं त्वेतद्रहस्यं वक्तुं काचिद्विश्वासभूमिर्नास्ति । तथापि निभृतं कृत्वा कथयामि शृणु । वनमिदमपूर्वसत्त्वाधिष्ठितमतो ऽस्माकं त्याज्यं । तथाविधश्च श्रुतस्त्वयाप्यपूर्वशब्दो महान् । शब्दानुरूपेणास्य प्राणिनो बलेनापि महता भवितव्यं । दमनक उवाच । अस्ति देव तावदयं महान् भयहेतुः ।

शब्दोऽस्माभिरप्याकर्णितः। किंतु स किं मन्त्री यः प्रथमं भूमित्यागं युद्धोद्योगं वोपदिशति। देव भृत्यानामुपयोग एव ज्ञातव्यः।

यतः। बन्धुस्त्रीभृत्यवर्गस्य बुद्धेः सत्त्वस्य चात्मनः।
आपन्निकषपाषाणे नरो जानाति सारतां ॥ ७८ ॥

सिंहो ब्रूते। भद्र महती शङ्का मां बाधते। दमनकः स्वगतं। अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां संभाषसे। प्रकाशं ब्रूते। देव यावदहं जीवामि तावद्भयं न कर्तव्यं। किंतु करटकादयोऽप्याश्वास्यन्तां यस्मादापत्काले प्रतीकाराय दुर्लभः पुरुषसमवायः। ततस्तौ दमनककरटकौ राज्ञा महाप्रसादेन पूजितौ भयप्रतीकारं प्रतिज्ञाय चलितौ। करटको गच्छन् दमनकमाह। सखे किं शक्यप्रतीकारोऽयं भयहेतुरशक्यप्रतीकारो वेत्यज्ञात्वा भयोपशमं प्रतिज्ञाय कथं भवता महाप्रसादो गृहीतः। यतोऽनुपकुर्वाणो न कस्याप्युपायनं गृह्णीयाद्विशेषतश्च राज्ञः।

पश्य। यस्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजमयो हि सः। ॥ ७९ ॥

तथा हि। बालोऽपि नावमन्तव्यो मनुष्य इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ८० ॥

दमनको विहस्याह। मित्र तूष्णीमास्यतां। ज्ञातं मया भयकारणं बलीवर्धनर्दितं ह्येतत्। वृषभाश्चास्माकमपि भक्ष्याः किं पुनः सिंहस्य। करटको ब्रूते। यद्येवं तदा किं स्वामित्रासस्तत्रैव किं नापनीतः। दमनको ब्रूते। यद्येवं क्रियते तदा कथमयं प्रसादलाभः स्यात्।

अपरं च शृणु। निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥ ८१ ॥

Fab. IV. करटकः पृच्छति कथमेतत्। दमनकः कथयति। अस्त्यर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः। तस्य पर्वतकुहरमधिशयानस्य केशराग्रं प्रत्यहं कश्चिन्मूषिकश्छिनत्ति। स सिंहः केशराग्रं लूनं दृष्ट्वा कुपितस्तं विवरान्तर्गतं मूषिकमलभमानो ऽचिन्तयत्। किमत्र विधेयं।

यतः। क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते।
तं निहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः॥ ८२॥

इत्यालोच्य तेन सिंहेन ग्रामं गत्वा दधिकर्णनामा विडालो मांसाद्याहारं दत्त्वा प्रयत्नादानीय स्वकन्दरे धृतः। ततस्तद्भयान्मूषिको न बहिर्निःसरति। तेनासौ सिंहो ऽक्षतकेशरः सुखं स्वपिति। मूषिकशब्दं यदा यदा शृणोति तदा तदा मांसाहारदानेन तं विडालं संवर्धयति। अथैकदा स मूषिकः क्षुधा पीडितो बहिश्चरन् मार्जारेण प्राप्तो व्यापादितश्च। अनन्तरं स सिंहो यदा कदाचिदपि तस्य मूषिकस्य शब्दं न शुश्राव तदोपयोगाभावाद्विडालस्याहारदाने मन्दादरो बभूव। ततो ऽसौ दधिकर्णो ऽप्याहाराभावाद्दुर्बलो ऽभवत्। अतो ऽहं ब्रवीमि निरपेक्षो न कर्तव्य इत्यादि। ततो दमनककरटकौ संजीवकसमीपं गतौ। तत्र करटकस्तरुतले साटोपमुपविष्टः। दमनकस्तं वृषमुपसृत्य ब्रूते। अरे वृषभ एष राज्ञा पिङ्गलकेनारण्यरक्षार्थं सेनापतिर्नियुक्तः करटकस्त्वां समाज्ञापयति सत्वरमागच्छ नो चेदितो ऽरण्याद्दूरमपसर। अन्यथा विरुद्धं ते फलिष्यति। ततो देशव्यवहारानभिज्ञः संजीवकः सभयमुपसृत्य करटकं प्रणतवान्।

तथा चोक्तं। मतिरेव बलाद्गरीयसी यदभावे करिणामियं दशा।
इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन्॥ ८३॥

अथ संजीवकः साशङ्कमाह। सेनापते किं मया कर्तव्यं तदभिधीयतां।

करटको ब्रूते । यद्यत्र कानने स्थातुमिच्छा वर्तते तदा देवपादारविन्दं प्रणम । संजीवको वदति । अभयवाचं मे यच्छ तदा गच्छामि । करटकेनोक्तं । अलमनया शङ्कया ।

यतः । तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून् प्रबाधते महान् महत्येव करोति विक्रमं ॥ ८४ ॥

ततस्तौ संजीवकं नातिदूरे संस्थाप्य पिङ्गलकसमीपं गतौ । ततो राज्ञा सादरमालोकितौ प्रणम्योपविष्टौ । राजाह । दृष्टः स जन्तुः । दमनको ब्रूते । देव दृष्टो विनतश्च । किंतु महाबलोऽसौ यथा देवेनाज्ञातस्तथैवेदानीं देवपदं द्रष्टुमिच्छति सः । ततः सज्जीभूयोपविश्य दृश्यतां । किंतु शब्दमात्रान्न भेतव्यं ।

तथा चोक्तं । शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणं ।
शब्दहेतुं परिज्ञाय कुट्टिनी गौरवं गता ॥ ८५ ॥

Fab V. राजाह कथमेतत् । दमनकः कथयति । अस्ति श्रीपर्वतमध्ये ब्रह्मपुराभिधानं नगरं । तत्प्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः श्रूयते । एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः खादितश्च । तत्पाणितः पतिता घण्टा वानरैः प्राप्ता । ते वानरास्तां घण्टामनुक्षणं वादयन्ति । ततो तन्नगरवासिजनैः स मानुषः खादितो दृष्टः प्रतिक्षणं घण्टावादश्च श्रूयते । अनन्तरं घण्टाकर्णः कुपितो मानुषं खादतीत्युक्त्वा जनाः सर्वे नगरात् पलायिताः । ततः कुट्टिन्या बहुशो विमृश्य वानरो घण्टां वादयतीति स्वयं परिज्ञाय राजा विज्ञापितः । देव यदि धनोपक्षयः क्रियते तदाहमेनं घण्टाकर्णं साधयामि । ततो राज्ञा धनं दत्वा प्रस्थापिता । कुट्टिन्या च मण्डलपूजागणचक्रादिभिराश्चर्यगौरवं दर्शयित्वा स्वयं वानरप्रिय-

फलानि समादाय वनं प्रविश्य फलान्यवकीर्णानि । ततो घण्टां परित्यज्य वानराः सर्वे फलासक्ता बभूवुः । कुट्टिनी घण्टामादाय समागता । ततः सा सकललोकपूज्याभवत् । अतो ऽहं ब्रवीमि शब्दमात्रान्न भेतव्यमित्यादि । ततस्ताभ्यां संजीवकः समानीय राज्ञो दर्शनं कारितः । अथ तेन सहान्योन्यस्नेहेन सो ऽपि चिरकालं निवसति । अथ कदाचित् तस्य सिंहस्य भ्राता स्तब्धकर्णो नाम समागतः । तस्यातिथ्यं कृत्वा समुपवेश्य पिङ्गलकस्तदाहारार्थं पशून् हन्तुं प्रचलितः । अनन्तरं संजीवको ब्रूते । देव अद्य हतमृगाणां मांसानि क्व । राजाह दमनककरटकौ जानीतः । ततः संजीवको ब्रूते । ज्ञायतां किमस्ति नास्ति वा । सिंहो विहस्याह नास्त्येव तत् । संजीवको वदति । कथमेतावन्मांसं ताभ्यां खादितं । राजाह । खादितं व्ययितमवधीरितं च प्रत्यहमेषः क्रमः । संजीवको ब्रूते । कथं श्रीमद्देवपादानामगोचरेणैवं क्रियते । राजाह । अथ किं । संजीवको वदति । नैतदुचितं ।

तथा चोक्तं ।

नानिवेद्य प्रकुर्वीत भृत्यः किंचिदपि स्वयं ।
कार्यमापत्प्रतीकारादन्यत्र जगतीपतेः ॥ ८६ ॥

अन्यच्च । कमण्डलूपमो ऽमात्यस्तनुत्यागी बहुग्रहः ।
नृपतिः किंक्षणो मूर्खो दरिद्रः किंवराटकः ॥ ८७ ॥

अपरं च । तस्यायत्यां सदा श्रेयो यः काकिन्यापि वर्धयेत् ।
कोषः कोषवतः प्राणाः प्राणाः प्राणा न भूपतेः ॥ ८८ ॥

किं च । धन्यो ऽन्यैरकुलाचारैः सेव्यतामिति पूरुषः ।
धनहीनः स्वपत्न्यापि त्यज्यते किं पुनः परैः ॥ ८९ ॥

एतच्च राज्ञः प्रधानं दूषणं ।

पश्य ।

अतिव्ययोऽनपेक्षा च तथार्जनमधर्मतः ।
कोषाणां दूरसंस्थानं कोषव्यसनमुच्यते ॥ १० ॥

यतः । क्षिप्रमायमनालोच्य व्ययमानः स्ववाञ्छया ।
अमणायत एवासौ धनी वैश्रवणोपमः ॥ ११ ॥

ततस्तद्वाक्यं श्लाघयित्वा स्तब्धकर्णो ब्रूते । शृणु भ्रातः । चिराश्रितावेतौ दमनककरटकौ संधिविग्रहकार्याधिकारिणौ । कार्याधिकारी च नार्थाधिकारे नियोक्तव्यः । अपरं च नियोगप्रस्तावे यत् किंचित् श्रुतं तत् कथयामि ।

ब्राह्मणः क्षत्रियो बन्धुर्नाधिकारे प्रशस्यते ।
ब्राह्मणः सिद्धमप्यर्थं कृच्छ्रेणापि न यच्छति ॥ १२ ॥
नियुक्तः क्षत्रियो द्रव्ये खड्गं दर्शयते ध्रुवं ।
सर्वार्थं ग्रसते बन्धुराक्रम्य ज्ञातिभावतः ॥ १३ ॥
अपराधेऽपि निःशङ्को नियोगी चिरसेवकः ।
स स्वामिनमवज्ञाय चरेच्च निरवग्रहः ॥ १४ ॥
उपकर्ताधिकारस्थः स्वापराधं न मन्यते ।
उपकारं ध्वजीकृत्य सर्वमेव विलुम्पति ॥ १५ ॥
उपांशुक्रीडितोऽमात्यः स्वयं राजायते यतः ।
अवज्ञा क्रियते तेन सदापरिचयाद्ध्रुवं ॥ १६ ॥
अन्तर्दुष्टः सदायुक्तः सर्वानर्थकरः किल ।
शकुनिः शकटारश्च दृष्टान्तावत्र भूपतेः ॥ १७ ॥
सदायत्त्यामसाध्यः स्यात् समृद्धः सर्व एव हि ।
सिद्धानामयमादेश ऋद्धिश्चित्तविकारिणी ॥ १८ ॥

प्राप्तार्थाग्रहणं द्रव्यपरीवर्तो ऽनुरोधनं ।
उपेक्षा बुद्धिहीनत्वं भोगो ऽमात्यस्य दूषणं ॥ ९९ ॥
नियोग्यर्थग्रहोपायो राज्ञां नित्यपरीक्षणं ।
प्रतिपत्तिप्रदानं च तथा कर्मविपर्ययः ॥ १०० ॥
नापीडिता वमन्त्युच्चैरन्तःसारं महीपतेः ।
दुष्टव्रणा इव प्रायो भवन्ति हि नियोगिनः ॥ १०१ ॥
मुहुर्नियोगिनो बोध्या वसुधारा महीभुजां ।
असकृत् पीडितं स्नानवस्त्रं मुञ्चेद्बहूदकं ॥ १०२ ॥

एतत् सर्वं ज्ञात्वा यथावसरं व्यवहर्तव्यं । पिङ्गलक आह । अस्ति तावदेवं किं त्वेतौ सर्वथा न मम वचनकरौ । स्तब्धकर्णो ब्रूते । एतत् सर्वमनुचितं । यतः ।

आज्ञाभङ्गकरान् राजा न क्षमेत सुतान् अपि ।
विशेषः को हि राज्ञो वा राज्ञश्चित्रगतस्य वा ॥ १०३ ॥

तथा चोक्तं । स्तब्धस्य नश्यति यशो विषमस्य मैत्री ।
नष्टक्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः कृपणस्य सौख्यं ।
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ १०४ ॥

विशेषतश्च । तस्करेभ्यो नियुक्तेभ्यः शत्रुभ्यो नृपवल्लभात् ।
नृपतिर्निजलोभाच्च प्रजा रक्षेत् पितेव हि ॥ १०५ ॥

तद्भ्रातः सर्वथास्मद्वचनं क्रियतां । आहारो ऽप्यस्माभिः कृत एव । अयं संजीवकः शस्यभक्षकः । अतो ऽर्थाधिकारे चायमेव नियुज्यतां । तथानुष्ठिते सति पिङ्गलकसंजीवकयोः सर्वबन्धुभृत्यपरित्यागान्महता स्नेहेन कालो ऽतिवर्तते । ततो ऽनुजीविनामप्याहारदानशैथिल्यदर्शनाद्दमनककरटकाव-

न्योन्यं चिन्तयतः। तत्राह दमनकः। किमत्र कर्तव्यं। आत्मकृतोऽयं दोषः। स्वयं कृते च दोषे परिदेवनमप्यनुचितं।

तथा चोक्तं। स्वर्णरेखामहं स्पृष्ट्वा बद्ध्वात्मानं च दूतिका।
आदित्सुश्च मणिं साधुः स्वदोषाद्दुःखिता इमे ॥ १०६ ॥

Fab. VI. करटको ब्रूते कथमेतत्। दमनकः कथयति। अस्ति काञ्चनपुरनाम्नि नगरे राज्ञा वीरविक्रमो नाम। तस्य धर्माधिकारिणा कश्चिन्नापितो बध्यभूमिं नीयमानः कन्दर्पकेतुनाम्ना परिव्राजकेन साधुद्वितीयेन नायं बध्य इत्युक्त्वा वस्त्राञ्चले धृतः। राजपुरुषा ऊचुः किमिति नायं बध्यः। स आह श्रूयतां। स्वर्णरेखामहं स्पृष्ट्वेत्यादि पठति। त आहुः कथमेतत्। परिव्राजकः

Fab. VII. कथयति। अहं सिंहलद्वीपस्य भूपतेर्जीमूतकेतोः पुत्रः कन्दर्पकेतुर्नाम। अथैकदा केलिकाननावस्थितेन मया पोतवणिङ्मुखाच्छ्रुतं यदत्र समुद्रमध्ये चतुर्दश्यामाविर्भूतकल्पतरुतले मणिकिरणावलिपर्यङ्के स्थिता सर्वालंकारभूषिता लक्ष्मीरिव वीणां वादयन्ती काचित् कन्यका दृश्यते इति। अतोऽहं पोतवणिजमादाय पोतमारुह्य तत्र गतः। अनन्तरं तत्रार्द्धमग्ना सा मयावलोकिता। ततस्तल्लावण्यगुणाकृष्टेन मया तत्पश्चाज्झम्पो दत्तः। अनन्तरं कनकपत्तनं प्राप्य सुवर्णप्रासादे तथैव सा पर्यङ्कावस्थिता विद्याधरीभिरुपास्यमाना मयावलोकिता। तयाप्यहं दूरादेव दृष्ट्वा सखीं प्रस्थाप्य सादरं संभाषितः। मया पृष्टया तत्सख्या च समाख्यातं। एषा कन्दर्पकेलिनाम्नो विद्याधरचक्रवर्तिनः पुत्री रत्नमञ्जरी नाम प्रतिज्ञाविवाह्या। यः कनकपत्तनं स्वचक्षुषागत्य पश्यति स एव पितुरगोचरोऽपि मां परिणेष्यतीति मनसः संकल्पः। तदेनां गन्धर्वविवाहेन परिणयतु भवान्। अथ वृत्ते गन्धर्वविवाहे तयैव सह रममाणस्तत्राहं तिष्ठामि। तत एकदा रहसि तयोक्तं।

स्वामिन् स्वेच्छया सर्वमिदमुपभुज्यतां । किंत्वेषा चित्रगता स्वर्णरेखा नाम विद्याधरी न कदापि स्प्रष्टव्या । पश्चात् तद्वचनादुपजातकौतुकेन मया स्वर्णरेखायाः स्तने स्पृष्टे तया च चित्रगतयाप्यहं तथा कृत्वा चरणपद्मेनाहतः स्वराष्ट्रे पतितः । तदारभ्य दुःखार्त्तोऽहं प्रव्रजितः पृथिवीं भ्राम्यन्निमां नगरीमनुप्राप्तः । अत्र चातिक्रान्ते दिवसे गोपगृहे सुप्तः सन्नपश्यं । ततः प्रदोषसमये गोष्ठादागतः स गोपः स्वबधूं दूत्या सह मन्त्रयन्तीमपश्यत् । ततस्तां गोपीं ताडयित्वा स्तम्भे बद्ध्वा सुप्तः । ततोऽर्द्धरात्रेऽसावेतस्या दूती नापितबधूः पुनरागता तां गोपीमुवाच । तव वियोगानलदग्धोऽसौ मुमूर्षुरिव वर्त्तते ।

तथा चोक्तं । रजनीचरनाथेन खण्डिते तिमिरे निशि ।
यूनां मनांसि विव्याध दृष्ट्वा दृष्ट्वा मनोभवः ॥ १०७ ॥

तदहमात्मानमत्र बद्ध्वा तिष्ठामि । त्वं तत्र गत्वा तं संभाष्य सत्वरमागच्छ । तथानुष्ठिते सति गोपः प्रबुद्धोऽवदत् । इदानीं जारान्तिकं कथं न यासि । ततो यदासौ न किंचिद्वदति तदा दर्पान्मम वचसि प्रत्युत्तरं न ददासि । इत्युक्त्वा प्रकुप्य तेन गोपेनास्या नासिका छिन्ना । तथा कृत्वा पुनः सुप्तो गोपो निद्रामुपगतः । अथागता सा गोपी दूतीमपृच्छत् । दूति का वार्ता । दूत्योक्तं पश्य मुखमेव वार्तां कथयिष्यति । अनन्तरं सा गोपी तथैवात्मानं बद्ध्वा स्थिता । इयं च दूती तां छिन्ननासिकां गृहीत्वा निजगृहं प्रविश्य स्थिता । ततः प्रातरनेन नापितेन क्षुरभाण्डं याचिता सा क्षुरमेकमदात् । पश्चादयं नापितो रुषा दूरादेव क्षुरं प्रक्षिप्तवान् । अथ कृतार्त्तनादेयं विनापराधेन स्वामिना मम नासिका छिन्ना । इति धर्माधिकारिणं निवेदितवती । सा च गोपी तेन गोपेन छिन्ना नासिका ते इति निर्भर्त्स्य पुनः पृष्टोवाच । अरे पामर मां

महासतीं विरूपयितुं कः समर्थः । किमन्यत् । मम व्यवहारमष्टौ लोकपाला एव जानन्ति ।

किं च । आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च ।
अहश्च रात्रिश्च उभे च संध्ये धर्मोऽपि जानाति नरस्य वृत्तं ॥ १०८ ॥

यद्यहं महासती निजस्वामिनं विहाय नान्यं मनसापि चिन्तयामि तदा मम मुखमक्षतं भवतु । किं बहुना । मम मुखं पश्य । ततो यावदसौ गोपः प्रदीपमानीय तस्या मुखं पश्यति तावदेवाक्षतमुखमवलोक्य तच्चरणयोः पतितः । तां बन्धनाच्च विमुच्योवाच । धन्योऽहं यस्येदृशी सती भार्या ।

Fab. VIII. यश्चायमास्ते साधुरेतद्वृत्तान्तमपि शृणुत । अयं स्वगृहान्निःसृतो द्वादशवर्षैर्वाणिज्यं कृत्वा मलयोपकण्ठाद्विविधानि रत्नान्यादायेमां नगरीमनुप्राप्तः । अत्र च वेश्यागृहे सुप्तः । तस्याः कुट्टिन्या गृहद्वारि स्थापितकाष्ठघटितवेतालस्य मूर्ध्नि रत्नमेकमुत्कृष्टमास्ते । तत्र लुब्धेनानेन साधुना रात्रावुत्थाय हस्तो यदा रत्ने दत्तस्तदैव तेन वेतालेन सूत्रसंचारितबाहुभ्यां परिपीडितः सन्नार्त्तनादं चकार । पश्चादुत्थाय कुट्टिन्योक्तं । पुत्र मलयोपकण्ठादागतोऽसि । तत् सर्वरत्नानि प्रयच्छ । नो चेदनेन न त्यक्तव्योऽसि । इत्थमेवायं चेटकः कृतः । ततोऽनेन सर्वरत्नानि समर्पितानि । अधुना चायमपि हृतसर्वस्वोऽस्मासु मिलितः । एतत् सर्वं श्रुत्वा राजपुरुषैर्धर्माधिकारी निवेदितः । तज्ज्ञात्वासौ नापितं त्यक्तवान् । कुट्टिनी च शासिता गोपी च निःसारिता कन्दर्पकेतुश्च पुरस्कृतः । अतोऽहं ब्रवीमि स्वर्णरेखामहं स्पृष्ट्वेत्यादि । तत् स्वयं कृतोऽयं दोषः । अत्र विलपनमनुचितं । क्षणं विमृश्य । मित्र सहस्व । यथा सौहृद्यमेव तयोः कारितं मया तथा मित्रभेदोऽपि कार्यः ।

यतः । अतथ्यान्यपि तथ्यानि दर्शयन्त्यतिपेशलाः ।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥ १०९ ॥

अपरं च । उत्पन्नेष्वपि कार्येषु मतिर्यस्य न हीयते ।
स निस्तरति दुर्गाणि गोपी जारद्वयं यथा ॥ ११० ॥

Fab. IX. करटकः पृच्छति कथमेतत् । दमनकः कथयति । अस्ति द्वारावत्यां नगर्यां कस्यचिद्गोपस्य वधूर्बन्धकी सा च ग्राममौख्येन दण्डनायकेन तत्पुत्रेण च समं रमते ।

तथा चोक्तं । नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः ॥ १११ ॥

अन्यच्च । न दानेन न मानेन नार्जवेन न सेवया ।
न शस्त्रेण न शास्त्रेण सर्वथा विषमाः स्त्रियः ॥ ११२ ॥

ततः कदाचिदसौ दण्डनायकपुत्रेण सह रममाणा तिष्ठति । अथ दण्डनायकोऽप्यागतः । तं दृष्ट्वा तत्पुत्रं कुशूले धृत्वा दण्डनायकेन समं तथैवाक्रीडत् । अनन्तरं तस्या भर्ता गोष्ठात् समागतः । तमालोक्य गोप्योक्तं । दण्डनायक त्वं लगुडं गृहीत्वा कोपं दर्शयन् सत्वरं याहि । तेन तथानुष्ठिते सति गोपालेन स्वगृहमागत्य भार्या पृष्टा । केन कार्येणात्र दण्डनायकः समागतः । सा ब्रूते । अयं केनापि कारणेन पुत्रस्योपरि क्रुद्धः स च मार्ग्यमाणोऽत्रागत्य प्रविष्टस्ततो मया कुशूले निक्षिप्य रक्षितः पित्रा चान्विष्यता गृहे न दृष्टः । अतोऽयं कुपित एव गच्छति । ततः सा तत्पुत्रं कुशूलादवतार्य स्वामिनं दर्शितवती ।

तथा चोक्तं । आहारो द्विगुणः स्त्रीणां बुद्धिस्तासां चतुर्गुणा ।
षड्गुणो व्यवसायश्च कामश्चाष्टगुणः स्मृतः ॥ ११३ ॥

अतोऽहं ब्रवीमि उत्पन्नेष्वपि कार्येषु इत्यादि । करटको ब्रूते । अस्त्येवं किंत्वनयोर्महान् निसर्गोपजातः स्नेहः कथं भेदयितुं शक्यः । दमनको ब्रूते । उपायश्चिन्तनीयः ।

तथा चोक्तं । उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काकी कनकसूत्रेण कृष्णसर्पमघातयत् ॥ ११४ ॥

Fab. X. करटकः पृच्छति कथमेतत् । दमनकः कथयति । कस्मिंश्चित् तरौ वायसदंपती निवसतः । तयोश्चापत्यानि तरुकोटरेऽवस्थितकृष्णसर्पेण खादितानि । ततः पुनर्गर्भवती वायसी ब्रूते । स्वामिन् त्यज्यतामयं तरुः । अत्रैतस्मात् कृष्णसर्पादावयोः संततिर्न भविष्यति कदाचित् ।

यतः । दुष्टा भार्या शठं मित्रं भृत्याश्चोत्तरदायकाः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ ११५ ॥

वायसोऽवदत् । प्रिये न भेतव्यं । वारं वारं मयैतस्यापराधः सोढः । इदानीं निग्रहीतव्यः । वायस्याह । कथमनेन बलवता सार्द्धं भवान् विग्रहीतुं समर्थः । वायसो ब्रूते । अलमनया शङ्कया ।

यतः । बुद्धिर्यस्य बलं तस्य अबुधस्य कुतो बलं ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ ११६ ॥

Fab. XI. वायस्याह कथमेतत् । वायसः कथयति । अस्ति मन्दराभिधाने पर्वते दुर्गान्तो नाम सिंहः । स च पशूनां बधं सदा विदधान एव तत्रास्ते । ततः सर्वैः पशुभिर्मिलित्वा सिंहो विज्ञप्तः । स्वामिन् किमिति सर्वपशूच्छेदः क्रियते । वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः । सिंहेनोक्तं भवत्वेवं । ततः प्रभृत्येकैकं पशुं सभयमुपनयन्ति ते । अथ कदाचिद्वृद्धशशकस्य वारः समायातः । सोऽचिन्तयत् ।

प्राणहेतोस्तु विनयः क्रियते जीविताशया ।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे ॥ ११७ ॥

तन्मन्दं मन्दमुपसर्पामि । इत्युपगच्छति सः । अथ तमालोक्य सिंहोऽपि क्षुधा पीडितः कोपादुवाच । कुतस्त्वं विलम्ब्यागतोऽसि । सोऽब्रवीत् । नायं ममापराधः पथि सिंहान्तरेण बलाद्धृतः सन् पुनरागमनाय शपथं कृत्वा स्वामिनं तन्निवेदयितुमत्रागतः । सिंहः सकोपमाह । सत्वरं गत्वा दर्शय क्वासौ दुरात्मा तिष्ठति । ततः शशकस्तं दृप्तं गृहीत्वा गम्भीरकूपसमीपं गतः । अत्रागत्य पश्यतु स्वामीत्युक्त्वा तस्मिन् कूपजले तस्यैव सिंहस्य प्रतिबिम्बं दर्शितवान् । अतोऽसौ दर्पाध्मातः कोपात् तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः । अतोऽहं ब्रवीमि बुद्धिर्यस्य बलं तस्येत्यादि । वायस्याह । सर्वमेतत् श्रुतं मया । इदानीं यत् कर्तव्यं ब्रूहि । वायसोऽवदत् । अत्रासन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति । स्नानसमये तदङ्गादवतारितकनकसूत्रं चञ्च्वा धृत्वानीयास्मिन् कोटरे धरिष्यसि । अथ कनकसूत्रानुसरणप्रवृत्तैः राजपुरुषैः कोटरे निरूप्यमाणे स कृष्णसर्पो द्रष्टव्यो व्यापादयितव्यश्च । अथ कदाचित् स्नातुं जलं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितं । तथानुष्ठिते तद्वृत्तं । अतोऽहं ब्रवीमि उपायेन हि यच्छक्यमित्यादि । करटक आह । यद्येवं तदा गच्छ शिवाः सन्तु ते पन्थानः । ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच । देव आत्ययिकं किमपि मन्यमान आगतोऽस्मि ।

भोगस्य भाजनं राजा न राजा कार्यभाजनं ।
राजकार्यपरिध्वंसान्मन्त्री दोषेण लिप्यते ॥ ११८ ॥

तथा हि पश्य अमात्यानामेष क्रमः ।

वरं प्राणपरित्यागः शिरसो वापि कर्तनं ।
न तु स्वामिपदावाप्तिपातकेच्छोरुपेक्षणं ॥ ११९ ॥

पिङ्गलकः सादरमाह । अथ भवान् किं वक्तुमिच्छति । दमनको ब्रूते । अयं तावत् संजीवकस्तवोपरि न सदृशव्यवहारः । तथा च स मत्संनिधान एव स्वामिनः शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति । एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्यं तूष्णीं स्थितः । दमनकः पुनराह । देव सर्वामात्यपरित्यागं कृत्वा त्वयैक एवायं सकलकार्याधिकारी कृतः । अयं च महान् दोषः । यतः ।

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ १२० ॥

अपरं च । एकं भूमिपतिः करोति सचिवं राज्यप्रमाणं यदा ।
तं मोहाच्छ्रयते मदः स च मदालस्येन निर्भिद्यते ।
निर्भिन्नस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा ।
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणान्तिकं द्रुह्यति ॥ १२१ ॥

अन्यच्च । विदग्धस्य च भक्तस्य दन्तस्य चलितस्य च ।
अमात्यस्य च दुष्टस्य मूलादुद्धरणात् सुखं ॥ १२२ ॥

किं च । यः कुर्यात् सचिवायत्तां श्रियं तद्व्यसने सति ।
सोऽन्धवज्जगतीपालः सीदेत् संचारकैर्विना ॥ १२३ ॥

स च सर्वकार्येषु स्वेच्छातः प्रवर्तते । तदत्र प्रमाणं स्वामी । एतज्जानामि ।

न सोऽस्ति पुरुषो राजन् यो न कामयते श्रियं ।
परस्य युवतीं रम्यां साकाङ्क्षं नेक्षते च कः ॥ १२४ ॥

सिंहो विहस्याह भद्र यद्यप्येवं तथापि संजीवको मम महास्नेहभूमिः ।

पश्य । कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अनेकदोषदुष्टोऽपि कायः कस्य न वल्लभः ॥ १२५ ॥
अपरं च । अप्रियाण्यपि कुर्वाणो यः प्रियः प्रिय एव सः ।
दग्धमन्दिरसारेऽपि कस्य वह्नावनादरः ॥ १२६ ॥

दमनकः पुनराह । देव स एव दोषः ।

यतः । यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।
सुतेऽमात्येऽप्युदासीने स लक्ष्म्याश्रीयते जनः ॥ १२७ ॥
शृणु देव । अप्रियस्य च पथ्यस्य परिणामः सुखावहः ।
वक्ता श्रोता च यत्रास्ति रमन्ते तत्र संपदः ॥ १२८ ॥

त्वया च मूलभृत्यान् अपास्यायमागन्तुकः पुरस्कृतः । एतच्चानुचितं कृतं ।

पश्य । मूलभृत्यापराधेन नागन्तुं प्रतिमानयेत् ।
नातः परतरोऽन्योऽस्ति राज्यभेदकरो यतः ॥ १२९ ॥

सिंहो ब्रूते । किमाश्चर्यं । मयायमभयवाचं दत्वानीतः संवर्धितश्च तत् कथं द्रुह्यति । दमनको वदति । देव शृणु ।

दुर्जनः प्रकृतिं याति सेव्यमानोऽपि नित्यशः ।
स्वेदनाभ्यञ्जनोपायैः श्वपुच्छमिव नामितं ॥ १३० ॥
अपरं च । स्वेदितो मर्दितश्चैव रज्जुभिः परिवेष्टितः ।
मुक्तो द्वादशभिर्वर्षैः श्वपुच्छः प्रकृतिं गतः ॥ १३१ ॥
अन्यच्च । वर्धनं वाथ सन्मानं खलानां प्रीतये कुतः ।
फलन्त्यमृतसेकेऽपि न पथ्यानि विषद्रुमाः ॥ १३२ ॥

अतोऽहं ब्रवीमि । अपृष्टोऽपि हितं ब्रूयाद्यस्य नेच्छेत् पराभवं ।
एष एव सतां धर्मो वैपरीत्यमतोऽसतां ॥ १३३ ॥

तथा चोक्तं । स स्निग्धो ऽकुशलान्निवारयति यस्तत् कर्म यन्निर्मलं ।
सा स्त्री यानुविधायिनी स मतिमान् यः सद्भिरभ्यर्च्यते ।
सा श्रीर्या न मदं करोति स सुधीर्यस्तृष्णया मुच्यते ।
तन्मित्रं यदकृत्रिमं स पुरुषो यः खिद्यते नेन्द्रियैः ॥ १३४ ॥

तद्यदि संजीवकव्यसनार्दितो विज्ञापितो ऽपि स्वामी न निवर्तते तदा भृत्ये न दोषः ।

तथा हि । नृपः कामासक्तो न गणयति कार्यं न च हितं ।
यथेष्टं स्वच्छन्दं प्रविचरति मत्तो गज इव ।
ततो दर्पाध्मातः स पतति यदा शोकगहने ।
तदा भृत्ये दोषान् क्षिपति न निजं वेत्त्यविनयं ॥ १३५ ॥

पिङ्गलकः स्वगतं ।
न परस्यापवादेन परेषां दण्डमाचरेत् ।
आत्मनावगमं कृत्वा बध्नीयात् पूजयेत वा ॥ १३६ ॥

तथा चोक्तं । गुणदोषावनिश्चित्य विधिना ग्रहनिग्रहे ।
स्वनाशाय यथा न्यस्तो दर्पात् सर्पमुखे करः ॥ १३७ ॥

प्रकाशं ब्रूते । संजीवकः प्रत्यादिश्यतां । दमनकः ससंभ्रममाह । देव मा मैवमेतावता मन्त्रभेदो जायते ।

तथा चोक्तं । मन्त्रबीजमिदं गुप्तं रक्षणीयं यथा तथा ।
मनागपि न भिद्येत तद्भिन्नं न प्ररोहति ॥ १३८ ॥

किं च । मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ १३९ ॥

यदसौ दृष्टदोषो ऽपि दोषान्निवृत्य संधातव्यस्तदतीवानुचितं ।

यतः । सकृद्दुष्टं तु यो मित्रं पुनः संधातुमिच्छति ।
स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा ॥ १४० ॥

सिंहोऽब्रवीत् । ज्ञायतां तावत् किमस्माकमसौ कर्तुं समर्थः । दमनक आह ।

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
पश्य टिट्टिभमात्रेण समुद्रो व्याकुलीकृतः ॥ १४१ ॥

Fab XII. सिंहः पृच्छति कथमेतत् । दमनकः कथयति । कदाचित् समुद्रतीरे टिट्टिभदम्पती निवसतः । तत्र टिट्टिभी चासन्नप्रसवा भर्तारमाह । नाथ प्रसवयोग्यं निभृतस्थानमन्विष्यतां । टिट्टिभोऽवदत् । नन्विदमेव स्थानं । सा ब्रूते । समुद्रवेलया स्थानमेतद्व्याप्यते । सोऽब्रवीत् । भद्रे किमहं निरङ्गस्तेन स्वगृहावस्थितसमुद्रेण विग्रहीतव्यः । टिट्टिभी विहस्याह । स्वामिंस्त्वया समुद्रेण च महदन्तरं । टिट्टिभोऽवदत् ।

*अथ वा । *दुःखमात्मा परिच्छेत्तुमेवं योग्यो न वेत्ति यः ।
अस्तीदृग्यस्य विज्ञानं स कृच्छ्रेऽपि न सीदति ॥ १४२ ॥

ततः स्वामिवचनात् सा तत्रैव प्रसूता । समुद्रेणापि तच्छक्तिजिज्ञासार्थं तदण्डान्यपहृतानि । अथ टिट्टिभी शोकार्त्ता भर्तारमाह । नाथ कष्टमापतितं तान्यण्डानि मे नष्टानि । टिट्टिभोऽवदत् । प्रिये मा भैषीः । इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गत्वा स्ववृत्तान्तमकथयत् । तद्वचनाद्गरुत्मता स्वभर्ता नारायणः सृष्टिस्थितिप्रलयहेतुर्विज्ञापितः सन् समुद्रं तदर्पणाय समादिदेश । ततो भगवदाज्ञां मौलौ निधाय समुद्रेण टिट्टिभस्य तान्यण्डानि समर्पितानि । अतोऽहं ब्रवीमि अङ्गाङ्गिभावमज्ञात्वा इत्यादि । राजाह । कथमसौ ज्ञातव्यो द्रोहबुद्धिरिति । दमनकः पुनराह । यदासौ शृङ्गाग्रप्रहरणाभिमुखश्चकित इवागच्छति तदा ज्ञास्यति स्वामी ।

ततस्तमेवमुक्त्वा संजीवकसमीपं गतः । तत्र गतश्च मन्दं मन्दमुपसर्पन् विस्मितमिवात्मानमदर्शयत् । संजीवकेन सादरमुक्तं भद्र कुशलं ते । दमनको ब्रूते । अनुजीविनां कुतः कुशलं ।

यतः । संपत्तयः पराधीनाः सदा चित्तमनिर्वृतं ।
स्वजीविते ऽप्यविश्वासस्तेषां ये राजसंश्रिताः ॥ १४३ ॥

अन्यच्च । को ऽर्थान् प्राप्य न गर्वितो विषयिणः कस्यापदो ऽस्तं गताः ।
स्त्रीभिः कस्य न खण्डितं भुवि मनः को नाम राज्ञां प्रियः ।
कः कालस्य न गोचरान्तरगतः को ऽर्थी गतो गौरवं ।
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥ १४४ ॥

संजीवकेनोक्तं । सखे ब्रूहि किमेतत् । दमनक आह किं ब्रवीमि मन्दभाग्यः ।

पश्य । यथा समुद्रे निमज्जन् लब्ध्वा सर्पावलम्बनं ।
न मुञ्चति न चादत्ते तथा मूढो ऽस्मि संप्रति ॥ १४५ ॥

यतः । एकत्र राजविश्वासो नश्यत्यन्यत्र बान्धवः ।
किं करोमि क्व गच्छामि पतितो दुःखसागरे ॥ १४६ ॥

इत्युक्त्वा दीर्घं निःश्वस्योपविष्टः । संजीवको ब्रूते । मित्र तथापि सुविस्तरं मनोगतमुच्यतां । दमनको विषण्ण इव सुनिभृतमाह । यद्यपि राजविश्वासो न कथनीयस्तथापि भवान् अस्मदीयप्रत्ययादागतः । तन्मया परलोकार्थिनावश्यं तव हितमाख्येयं । शृणु । अयं स्वामी तवोपरि विकृतबुद्धी रहसि वक्ति च । संजीवकमेव हत्वा स्वपरिवारं तर्पयामि । एतच्छ्रुत्वा संजीवकः परं विषादमगमत् । दमनकः पुनराह । अलं विषादेन । प्राप्तकालकार्यमनुष्ठीयतां । संजीवकः क्षणं विमृश्योवाच । सुष्ठु खल्विदमुच्यते । स्वगतं । किं वा दुर्जनचेष्टितं न वा । इत्येतद्व्यवहारान्निर्णेतुं न शक्यते ।

यतः । दुर्जनगम्यानार्यः प्रायेणापात्रभृद्भवति राजा ।
कृपणानुसारि च धनं देवो गिर्युदधिवर्षी च ॥ १४७ ॥
कश्चिदाश्रयसौन्दर्याद्धत्ते शोभामसज्जनः ।
प्रमदालोचनन्यस्तं मलीमसमिवाञ्जनं ॥ १४८ ॥
कथमेतत् । आराध्यमानो नृपतिः प्रयत्नान्न तोषमायाति किमत्र चित्रं ।
अयं त्वपूर्वप्रतिमाविशेषो यः सेव्यमानो रिपुतामुपैति ॥ १४९ ॥

तदशक्यो ऽयमर्थः प्रमातुं ।

यतः । निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणाद्द्वेषिमनास्तु यो भवेत् कथं जनस्तं परितोषयिष्यति ॥

प्रकाशमाह । किं मयापकृतं राज्ञः । अथ निर्निमित्तापकारिणो भवन्ति राजानः । दमनको ब्रूते । एवमेतत् शृणु ।

विज्ञैः स्निग्धैरुपकृतमपि द्वेष्यतामेति किंचित् ।
साक्षादन्यैरपकृतमपि प्रीतिमेवोपयाति ।
दुर्ग्राह्यत्वान्नृपतिमनसां नैकभावाश्रयाणां ।
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ १५१ ॥

अन्यच्च । कृतशतमसत्सु नष्टं सुभाषितशतं च नष्टमबुधेषु ।
वचनशतमवचनकरे बुद्धिशतमचेतने नष्टं ॥ १५२ ॥

किं च । चन्दनतरुषु भुजंगा जलेषु कमलानि तत्र च ग्राहाः ।
गुणघातिनश्च भोगे खला न च सुखान्यविघ्नानि ॥ १५३ ॥

अयं तावत् स्वामी वाङ्मधुरो विषहृदयो मया ज्ञातः ।

यतः । दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्द्धासनो ।
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तोत्तरः ।

अन्तर्गूढविषो बहिर्मधुमयश्चातीव मायापटुः ।
को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥ १५४ ॥

तथा हि पश्य ।

पोतो दुस्तरवारिराशितरणे दीपोऽन्धकारागमे ।
निर्वाते व्यजनं मदान्धकरिणां दर्पोपशान्त्यै शृणिः ।
इत्थं तद्भुवि नास्ति यत्र विधिना नोपायचिन्ता कृता ।
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः ॥ १५५ ॥

संजीवको ब्रूते । कष्टं भोः कथमहं शस्यभक्षकः सिंहेन निपातयितव्यः ।

यतः । द्वयोरेव समं वित्तं द्वयोरेव समं बलं ।
तयोर्विवादो मन्तव्यो नोत्तमाधमयोः क्वचित् ॥ १५६ ॥

पुनर्विचिन्त्य स्वगतं । न जाने केनायं राजा ममोपरि विकारितः । भेदमुपगताच्च राज्ञः सदैव भेतव्यं ।

यतः । मन्त्रिणा पृथिवीपालचित्तं विघटितं क्वचित् ।
वलयं स्फटिकस्येव को हि संधातुमीश्वरः ॥ १५७ ॥

अन्यच्च । वज्रं च राजतेजश्च द्वयमेवातिभीषणं ।
एकमेकत्र पतति पतत्यन्यत् समन्ततः ॥ १५८ ॥

ततः संग्राममृत्युरेवाश्रीयतां । इदानीं तदाज्ञानुवर्तनमनुचितं ।

यतः । मृतः प्राप्नोति वा स्वर्गं हत्वा शत्रुं सुखानि वा ।
उभावपि हि शूराणां गुणावेतौ सुदुर्लभौ ॥ १५९ ॥

युद्धकालश्चायं ।

यतः । यत्रायुद्धे ध्रुवं मृत्युर्युद्धे जीवितसंशयः ।
तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः ॥ १६० ॥

अयुद्धे हि यदा पश्येन्न किंचिद्धितमात्मनः ।
युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह ॥ १६१ ॥
जये वा लभते लक्ष्मीं मृते वापि सुराङ्गनां ।
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे ॥ १६२ ॥

प्रकाशं । भो मित्र कथय कथमसौ मया जिघांसुरिति ज्ञातव्यः । दमनको ब्रूते । यदासौ पिङ्गलकः समुन्नतलांगुल उन्नतचरणो विवृतास्यस्त्वां पश्यति तदा त्वमपि स्वविक्रमं दर्शयिष्यसि ।

यतः । बलवान् अपि निस्तेजाः कस्य नाभिभवास्पदं ।
निःशङ्कं धीयते लोकैः पश्य भस्मचये पदं ॥ १६३ ॥

किंतु सर्वमेतत् सुगुप्तमनुष्ठातव्यं । नो चेन्न त्वं नाहमिति । एवमुक्त्वा दमनकः करटकसमीपं गतः । करटकेनोक्तं किं निष्पन्नं । स आह । निष्पन्नोऽयमन्योन्यभेदः । करटको ब्रूते । कः संदेहः ।

यतः । बन्धुः को नाम दुःस्थानां कुप्येत् को नातियाचितः ।
को न तृप्यति वित्तेन कुकृत्ये को न पण्डितः ॥ १६४ ॥

अन्यच्च । दुर्वृत्तः क्रियते धूर्त्तैः श्रीमान् आत्मविवृद्धये ।
किं नाम खलसंसर्गः कुरुते नाश्रयाशवत् ॥ १६५ ॥

यतः । सद्भावप्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषं ॥ १६६ ॥

ततो दमनकः पिङ्गलकसमीपं गत्वा देव समागतोऽसौ पापाशयस्ततः सज्जीभूय स्थीयतामित्युक्त्वा पूर्वोक्तमाकारं कारयामास । अथ संजीवकोऽप्यागतः सन् तथाविधं विकृताकारं सिंहं दृष्ट्वा स्वानुरूपं विक्रमं चकार । ततस्तयोर्महाहवे वृत्ते संजीवकः सिंहेन व्यापादितः । अथ पिङ्गलकः

संजीवकं व्यापाद्य विश्रान्तः सशोक इवावस्थितो ब्रूते । किं मया दारुणं कर्म कृतं ।

यतः । परैः संभुज्यते राज्यं स्वयं पापस्य भाजनं ।
धर्मातिक्रमतो राजा सिंहो हस्तिबधादिव ॥ १६७ ॥

अपरं च । भूम्येकदेशस्य गुणान्वितस्य भृत्यस्य वा बुद्धिमतः प्रणाशः ।
भृत्यप्रणाशो मरणं नृपाणां नष्टा हि भूमिः सुलभा न भृत्याः ॥ १६८ ॥

दमनको ब्रूते । स्वामिन् कोऽयं नूतनो नयो यदरातिं हत्वा संतापः क्रियते ।

तथा ह्युक्तं । पिता वा यदि वा भ्राता पुत्रो वा यदि वा सुहृत् ।
प्राणच्छेदकरा राज्ञा हन्तव्या भूतिमिच्छता ॥ १६९ ॥

अपि च । नृपो धर्मार्थतत्त्वज्ञो नैकान्तकरुणो भवेत् ।
न हि हस्तस्थमप्यर्थं क्षमावान् रक्षितुं क्षमः ॥ १७० ॥

किं च । क्षमा शत्रौ च मित्रे च यतीनामेव भूषणं ।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणं ॥ १७१ ॥

अपरं च । राज्यलोभादहंकारादिच्छतः स्वामिनः पदं ।
प्रायश्चित्तं हि तस्यैकं जीवोत्सर्गो न चापरं ॥ १७२ ॥

अन्यच्च । राजा घृणी ब्राह्मणः सर्वभक्षः स्त्री चावशा दुष्प्रकृतिः सहायः ।
प्रेष्यः प्रतीपोऽधिकृतः प्रमादी त्याज्या अमी यश्च कृतं न वेत्ति ॥

विशेषतश्च देव इत्यमेवैतत् ।
सत्यानृता च परुषा प्रियवादिनी च हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुररत्नधनागमा च वेश्याङ्गनेव नृपनीतिरनेकरूपा ॥ १७४ ॥

इति दमनकेन परितोषितः स्वां प्रकृतिमापन्नः पिङ्गलकः सिंहासन

उपविष्टः । अथ दमनकः प्रहृष्टमना विजयतां महाराजः शुभमस्तु सर्वजगता-
मित्युक्त्वा यथासुखमवस्थितः ॥

विष्णुशर्मोवाच । सुहृद्भेदः श्रुतः । राजपुत्रा ऊचुः सुखिनः सद्वृत्तात्ताश्च वयं ।
विष्णुशर्माब्रवीत् । पुनरेवेदमस्तु ।

सुहृद्भेदस्तावद्भवतु भवतां शत्रुनिलये ।
खलः कालाकृष्टः प्रलयमुपसर्पत्वहरहः ।
जनो नित्यं भूयात् सकलसुखसंपत्तिवसतिः ।
कथायामेतस्यां सततमिह बालोऽपि रमतां ॥ १७५ ॥

इति हितोपदेशे सुहृद्भेदो नाम
द्वितीयकथासंग्रहः
समाप्तः ॥
॥ २ ॥

LIBER TERTIUS.

पुनः कथारम्भकाले राजपुत्रैरुक्तं । आर्य राजपुत्रा वयं तद्विग्रहं श्रोतुं नः कुतूहलमस्ति । विष्णुशर्मोवाच । यदेव भवद्भ्यो रोचते तदेव कथयामि । विग्रहः श्रूयतां यस्यायमाद्यः श्लोकः ।

हंसैः सह मयूराणां विग्रहे तुल्यविक्रमे ।
विश्वास्य वञ्चिता हंसाः काकैः स्थित्वारिमन्दिरे ॥ १ ॥

Fab. I. राजपुत्रा ऊचुः कथमेतत् । विष्णुशर्मा कथयति । अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः । तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति । स च सर्वैर्जलचरपक्षिभिर्मिलित्वा पक्षिराज्येऽभिषिक्तः ।

यतः । यदि न स्यान्नरपतिः सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥ २ ॥

अपरं च । प्रजां संरक्षति नृपः सा वर्धयति पार्थिवं ।
वर्धनाद्रक्षणं श्रेयस्तदभावे सदप्यसत् ॥ ३ ॥

एकदासौ राजहंसः सुविस्तीर्णकमलपर्यङ्के सुखासीनः स्वपरिवारपरिवृतस्तिष्ठति । तं कुतश्चिद्देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः । राजोवाच । दीर्घमुख देशान्तरादागतोऽसि वार्तां कथय । दीर्घमुखो ब्रूते । देव अस्ति महती वार्ता तामाख्यातुं सकाम एवाहं सत्वरमागतः । श्रूयतां ।

अस्ति जम्बुद्वीपे विन्ध्यो नाम गिरिः । तत्र चित्रवर्णो नाम मयूरः पक्षिराजः प्रतिवसति । तस्यानुचरैश्चरद्भिः पक्षिभिरहं दग्धारण्ये चरन्नवलोकितः पृष्टश्च । कस्त्वं कुतः समागतोऽसि । ततो मयोक्तं । अहं कर्पूरद्वीपस्य चक्रवर्त्तिनो हिरण्यगर्भनाम्नो राजहंसस्यानुचरः कौतुकाद्देशान्तरं द्रष्टुमागतः । एतच्छ्रुत्वा पक्षिभिरुक्तं । तदनयोः को देशो भद्रतरो राजा च । ततो मयोक्तं । आः किमेवमुच्यते । महदन्तरं । यतः कर्पूरद्वीपः स्वर्ग एव द्वितीयो राजहंसश्च द्वितीयः स्वर्गपतिः । तदत्र मरुस्थले पतिता यूयं किं कुरुथ । अस्मद्देशो गम्यतां । ततोऽस्मद्वचनमाकर्ण्य ते पक्षिणः सकोपा बभूवुः ।

तथा चोक्तं । पयः पानं भुजंगानां केवलं विषवर्धनं ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥ ४ ॥

अन्यच्च । विद्वान् एवोपदेष्टव्यो नाविद्वांस्तु कदाचन ।
वानरान् उपदिश्याज्ञान् स्थानभ्रंशं ययुः खगाः ॥ ५ ॥

Fab II. राजोवाच कथमेतत् । दीर्घमुखः कथयति । अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः । तत्र तरौ निर्मितनीडक्रोडे पक्षिणः सुखं वर्षासु निवसन्ति । अथ नीलपटैरिव जलपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव । ततो वानरास्तरुतले भ्राम्यन्तः शीतार्त्ताः कम्पमाना बभूवुः । तथा तान् अवलोक्य कृपया पक्षिभिरुक्तं । भो भो वानराः ।

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः ।
हस्तपादादिसंयुक्ता यूयं किमिति सीदथ ॥ ६ ॥

तत् श्रुत्वा वानरैर्जातामर्षैरालोचितं । अहो निर्वातनीडगर्भस्थाः सुखिनः पक्षिणोऽस्मान् निन्दन्ति । तद्भवतु । तावद्वृष्टेरुपशमः । अनन्तरं शान्ते पानीयवर्षे तैर्वानरैर्वृक्षाग्रमारुह्य सर्वे नीडा भग्नाः । तेषामण्डानि चाधः

पतितानि । अतोऽहं ब्रवीमि विद्वानिवोपदेष्टव्य इत्यादि । राजाह । ततस्ततः । दीर्घमुखः कथयति । ततः कोपात् पक्षिभिरुक्तं । केनासौ तव राजहंसः कृतो राजा । ततो मयाप्युपजातकोपेनोक्तं । अयं ते मयूरः केन राजा कृतः । एतच्छ्रुत्वा ते मां हन्तुमुद्यताः । ततो मयापि स्वविक्रमो दर्शितः ।

यतः । अन्यदा भूषणं पुंसः क्षमा लज्जेव योषितः ।
पराक्रमः परिभवे वैयात्यं सुरतेष्विव ॥ ७ ॥

राजा विहस्योवाच । आत्मनश्च परेषां च यः समीक्ष्य बलाबलं ।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः ॥ ८ ॥

अन्यच्च । सुचिरं हि चरन् नित्यं क्षेत्रे शस्यमबुद्धिमान् ।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः ॥ ९ ॥

Fab. III. बकः पृच्छति कथमेतत् । राजा कथयति । अस्ति हस्तिनापुरे कर्पूरविलासो नाम रजकः । तस्य गर्दभोऽतिभारवाहाद्दुर्बलो मुमूर्षुरिवाभवत् । ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसंनिधाने शस्यक्षेत्रमध्ये नियुक्तः । ततो दूरात् तमवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते । स च सुखेन शस्यं चरति । अथ केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुः सज्जीकृत्यानतकायेनैकान्ते स्थितं । तं च दूराद्दृष्ट्वा गर्दभः पुष्टाङ्गो जातबलो गर्दभीयमिति मत्वा शब्दं कुर्वाणस्तदभिमुखं धावति । ततस्तेन रक्षकेण गर्दभोऽयमिति ज्ञात्वा लीलया व्यापादितः । अतोऽहं ब्रवीमि सुचिरं हि चरन् नित्यमित्यादि । राजाह ततस्ततः । दीर्घमुखो ब्रूते । पश्चात् तैः पक्षिभिरुक्तं । अरे पाप दुष्टबक अस्माकं स्वामिनमधिक्षिपसि तन्न क्षन्तव्यमिदानीमस्माभिः । इत्युक्त्वा सर्वे मां चञ्चुभिर्हत्वा सकोपा ऊचुः । पश्य रे मूर्ख तव राजहंसः सर्वथा मृदुः । तस्य राज्येऽधिकार एव नास्ति । यत एकान्ततो

मूढः करतलगतमप्यर्थं रक्षितुमक्षमः । स कथं पृथिवीं शास्ति । राज्यं वा तत् तस्य किं । त्वं च कूपमण्डूकः । तेन तदाश्रयमुपदिशसि ।

शृणु । सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥ १० ॥

अन्यच्च । हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः ।
अजा सिंहप्रसादेन वने चरति निर्भयं ॥ ११ ॥

अपरं च । महान् अप्यल्पतां याति निर्गुणे गुणविस्तरः ।
आधाराधेयभावेन गजेन्द्र इव दर्पणे ॥ १२ ॥

विशेषतश्च । व्यपदेशेन सिद्धिः स्यादतिशक्ते नराधिपे ।
शशिनो व्यपदेशेन शशकाः सुखमासते ॥ १३ ॥

Fab. IV. मयोक्तं कथमेतत् । पक्षिणः कथयन्ति । कदाचिद्वर्षास्वपि वृष्टेरभावात् तृषार्त्तो गजयूथो यूथपतिमाह । नाथ को ह्युपायो ऽस्माकं जीवनाय । अस्त्यत्र क्षुद्रजन्तूनां निमज्जनस्थानं वयं च निमज्जनाभावादन्धा इव भ्रमामः । किं कुर्मः । ततो हस्तिराजो नातिदूरं गत्वा निर्मलं ह्रदं तेषां दर्शितवान् । ततस्तत्तीरावस्थिताः शशका हस्तिपदाहतिभिर्बहवश्चूर्णिताः । अनन्तरं शिलीमुखो नाम शशकः सर्वान् आहूय विचारयामास । अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमेवात्रागन्तव्यं ततो विनष्टमस्मत्कुलं । अथ विजयो नाम वृद्धशशको ऽवदत् । मा विषीदत मयात्र प्रतीकारः कर्तव्यः । इत्यसौ प्रतिज्ञाय चलितः । गच्छता च तेनालोचितं कथं मया गजयूथनिकटे स्थित्वा वक्तव्यं ।

यतः । स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजंगमः ।
पालयन्नपि भूपालः प्रहसन्नपि दुर्जनः ॥ १४ ॥

अतोऽहं पर्वतशिखरमारुह्य यूथनाथं वक्ष्यामि । तथानुष्ठिते यूथनाथ उवाच । कस्त्वं कुतः समायातः । स ब्रूते । दूतोऽहं भगवता चन्द्रेण प्रेषितः । यूथपतिराह । कार्यमुच्यतां । विजयो वदति । शृणु गजेन्द्र ।

उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा ।
ते यथार्थस्य वक्तारोऽप्यवध्या हि भवादृशां ॥ १५ ॥

तदहं तदाज्ञया ब्रवीमि शृणु । यदेते चन्द्रसरोरक्षकाः शशकास्त्वया निःसारितास्तन्न भद्रं कृतं । यतो रक्षकास्ते ऽस्मदीयाः । अत एव लोके मे शशाङ्क इति प्रसिद्धिः । एवमुक्तवति दूते स यूथपतिर्भयादिदमाह । इदमज्ञानतः कृतं पुनर्नागमिष्यामि । दूत उवाच । तदत्र सरसि भगवन्तं प्रकोपात् कम्पमानं प्रणम्य प्रसाद्य च गच्छ । ततस्तेन रात्रौ नीत्वा तत्र ह्रदजले चञ्चलं प्रतिबिम्बं दर्शयित्वा यूथपतिः प्रणामं कारितः । देव अज्ञानादनेन कृतं क्षम्यतामित्युक्त्वा प्रस्थापितः । अतोऽहं ब्रवीमि व्यपदेशेन सिद्धिः स्यादित्यादि । ततो मयोक्तं । स एवास्मत्प्रभुर्महाप्रतापोऽतिसमर्थः । अथाहं तैः पक्षिभिर्बद्ध्वा कथमस्मद्भूमौ चरसि इत्यभिधाय चित्रवर्णस्य राज्ञः समीपं नीतः । ततो राज्ञः पुरो मामुपदर्श्य प्रणम्योक्तं तैः । देव अवधीयतां । एष दुष्टो बको ऽस्मद्देशे चरन्नपि देवपादान् अधिक्षिपति । राजाह । कोऽयं कुतः समायातः । त ऊचुः । राज्ञो राजहंसस्य हिरण्यगर्भस्यानुचरः कर्पूरद्वीपादागतः । अथाहं गृध्रेण मन्त्रिणा पृष्टः । कस्तत्र मुख्यमन्त्रीति । मयोक्तं । सर्वज्ञो नाम चक्रवाकः । गृध्र उवाच । युज्यते स्वदेशजातोऽसौ ।

यतः ।

स्वदेशजं कुलाचारविशुद्धमुपधाशुचिं ।
शास्त्रज्ञमव्यसनिनं व्यभिचारविवर्जितं ॥ १६ ॥

अधीतव्यवहारार्थं ख्यातं मौलं विपश्चितं ।
अर्थस्योत्पादकं सम्यग्विदध्यान्मन्त्रिणं नृपः ॥ १७ ॥

अत्रान्तरे शुकेनोक्तं । देव कर्पूरद्वीपादयो लघुद्वीपा जम्बुद्वीपान्तर्गता एव तत्रापि देवपादानामाधिपत्यं । ततो राज्ञाप्युक्तं । एवमेव ।

यतः । राजा मत्तः शिशुश्चैव प्रमदा धनगर्वितः ।
अप्राप्यमपि वाञ्छन्ति किं पुनर्लभ्यमेव यत् ॥ १८ ॥

ततो मयोक्तं । यदि वचनमात्रादेवाधिपत्यं सिध्यति तदा जम्बुद्वीपे ऽप्यस्मत्प्रभोर्हिरण्यगर्भस्य स्वाम्यमस्ति । शुक उवाच । उच्यतां कथमत्र निर्णयः । मयोक्तं संग्राम एव । ततो विहस्य राज्ञाह । स्वस्वामिनं गत्वा सुसज्जीकुरु । तदनन्तरं मयोक्तं । स्वदूतो ऽपि प्रस्थाप्यतां । राज्ञोवाच । कः प्रयातु तत्र दौत्येन यत एवंभूतो दूतः कार्यः ।

भक्तो गुणी शुचिर्दक्षः प्रगल्भो ऽव्यसनी क्षमी ।
ब्राह्मणः परमर्मज्ञो दूतः स्यात् प्रतिभाववान् ॥ १९ ॥

गृध्रो वदति । सन्त्येवंभूता बहवः । तथापि ब्राह्मण एव दूतः कर्तव्यः ।

यतः । प्रसादः कुरुते पत्युः संपत्तिं नाभिजात्यतां ।
कालिमा कालकूटस्य नापैति हरसंगमात् ॥ २० ॥

ततः शुक एव व्रजतु । राजा पुनराह । शुक त्वमेवानेन बकेन सह तत्र गत्वास्मदभिलषितं ब्रूहि । शुको ऽवदत् । यथाज्ञापयति देवः । किं त्वयं दुर्जनो बकः । तदनेन सह न गच्छामि ।

तथा ह्युक्तं ।

खलः करोति दुर्वृत्तं नूनं फलति साधुषु ।
दशाननो हरेत् सीतां बन्धनं स्यान्महोदधेः ॥ २१ ॥

अपरं च । न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित् ।
काकसंगाद्धतो हंसस्तिष्ठन् गच्छंश्च वर्त्तकः ॥ २२ ॥

Fab. V. राजोवाच कथमेतत् । शुकः कथयति । अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान् पिप्पलवृक्षस्तत्र हंसकाकौ निवसतः । कदाचिद्ग्रीष्मसमये परिश्रान्तः कश्चित् पथिकः तत्र तरुतले धनुः काण्डं च संनिधाने निधाय सुप्तः । ततः क्षणान्तरे तन्मुखाद्वृक्षच्छायापगता । अनन्तरं सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य तद्वृक्षस्थितेन हंसेन कृपया पक्षौ प्रसार्य पुनस्तत्र छाया कृता । ततो निर्भरनिद्रासुखिना तेनाध्वगेन मुखव्यादानं कृतं । अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तन्मुखे पुरीषोत्सर्गं कृत्वा पलायितः । ततो यावदसौ सहसोत्थाय वृक्षाग्रं निरीक्षते तावत् तेनावलोकितो हंसः काण्डेन हतो व्यापादितश्च । अतोऽहं ब्रवीमि न स्थातव्यमित्यादि । वर्त्तकवार्त्तामपि कथयामि । एकदा सर्वे पक्षिणो भगवतो गरुडस्य यात्राप्रसङ्गेन समुद्रतीरं प्रचलिताः । तत्र काकेन सह वर्त्तकश्चलितः । अथ गच्छतो गोपालस्य मस्तकावस्थितदधिभाण्डाद्वारं वारं तेन काकेन दधि खाद्यते । ततो यावदसौ दधिभाण्डं भूमौ निधाय ऊर्द्धमवलोकते तावत् तेन काकवर्त्तकौ दृष्टौ । ततस्तेन खेदितः काकः पलायितो वर्त्तकश्च मन्दगतिः प्राप्तो व्यापादितः । अतोऽहं ब्रवीमि न स्थातव्यं न गन्तव्यमित्यादि । ततो मयोक्तं । भ्रातः शुक किमेवं ब्रवीषि । मां प्रति यथा श्रीमद्देवपादास्तथा भवान् अपि । शुको ब्रूते । अस्त्वेवं किंतु । दुर्जनैरुच्यमानानि सस्मितानि प्रियाण्यपि ।
अकालकुसुमानीव भयं संजनयन्ति मे ॥ २३ ॥

दुर्जनत्वं च भवतो वाग्व्यापारादेव प्रत्यक्षीकृतं मया यदनयोर्भूपालयोर्विग्रहे भवद्वचनमेव निदानं ।

पश्य । प्रत्यक्षे ऽपि कृते दोषे मूर्खः शान्त्वेन तुष्यति ।
रथकारो निजां भार्यां सजारां शिरसाकरोत् ॥ २४ ॥

Fab. VI. राजोवाच कथमेतत् । शुकः कथयति । अस्ति यौवनश्रीनगरे मन्दमतिर्नाम रथकारः स च स्वभार्यां बन्धकीं जानात्येव किंतु जारेण सममेकस्थाने न हि स्वचक्षुषा पश्यति । ततो ऽसौ रथकारो ऽहमन्यग्रामं गच्छामीत्युक्त्वा चलितः सन् कियद्दूरं गत्वा पुनरागत्य स्वगृहे खट्वातले पतित्वा निभृतं स्थितः । अथ मम भर्ता ग्रामान्तरं गत इत्युपजातविश्वासया तया स जारः संध्याकाल एवाहूतः । पश्चात् तेन समं तस्यां खट्वायां सा निर्भरं क्रीडन्ती खट्वातलस्थितेन सह भूता किंचिदङ्गस्पर्शात् स्वामिनं विज्ञाय विषण्णाभवत् । ततो जारेणोक्तं । किमिति त्वं मया सहाद्य निर्भरं न रमसे । विस्मितेव प्रतिभासि । तयोक्तं । यो ऽसौ प्राणेश्वरः सो ऽद्य ग्रामान्तरं गतः । तेन विना सकलजनपूर्णो ऽप्ययं ग्रामो ऽरण्यवन्मां प्रतिभाति । किं भावि तत्र परस्थाने किं खादितवान् कथं वा प्रसुप्त इत्यस्मद्धृदयं विदीर्यते । जारेणोक्तं । किमेवंविधः स्नेहभूमिस्ते रथकारो यः कलहकारी बन्धकीति ब्रूते । ततस्तयोक्तं । शृणु रे बर्बर किं ब्रवीषि ।

परुषाण्यपि चोक्ता या दृष्टा वा क्रोधचक्षुषा ।
सुप्रसन्नमुखी भर्तुः सा नारी धर्मभागिनी ॥ २५ ॥

अपरं च ।

नगरस्थो वनस्थो वा पापो वा यदि वा शुचिः ।
यासां स्त्रीणां प्रियो भर्ता तासां लोका महोदयाः ॥ २६ ॥

अन्यच्च । भर्ता हि परमं स्त्रीणां भूषणं भूषणैर्विना ।
एषा विरहिता तेन शोभितापि न शोभते ॥ २७ ॥

त्वं च जारो मनोलौल्यात् पुष्पताम्बूलसदृशः कदाचित् सेव्यसे । स च स्वामी मां विक्रेतुं देवेभ्यो ब्राह्मणेभ्यो वा दातुं समर्थः । किं बहुना ।

तस्मिन् जीवति जीवामि मृते तस्मिन् म्रिये पुनः ।
तन्मरणेऽनुमरणमेष मे दृढनिश्चयः ॥ २८ ॥

यतः । तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे ।
तावत्कालं वसेत् स्वर्गे भर्तारं यानुगच्छति ॥ २९ ॥

अन्यच्च । व्यालग्राही यथा व्यालं बलादुद्धरते बिलात् ।
तद्वद्भर्तारमादाय स्वर्गलोके महीयते ॥ ३० ॥

अपरं च ।

चितौ परिष्वज्य विचेतनं पतिं प्रिया हि या मुञ्चति देहमात्मनः ।
कृतातिपापं शतलक्षमप्यसौ पतिं गृहीत्वा सुरलोकमाप्नुयात् ॥

एतत् सर्वं श्रुत्वा स रथकारो धन्योऽहं यस्यैतादृशी भार्या सहजवत्सला प्रियवादिनी च इति मनसि निधाय तां खट्वां स्त्रीपुरुषसहितां मूर्ध्नि कृत्वा चिरं ननर्त । अतोऽहं ब्रवीमि प्रत्यक्षेऽपि कृते दोष इत्यादि । ततोऽहं तेन राज्ञा यथाव्यवहारं संपूज्य प्रस्थापितः । शुकोऽपि मम पश्चादागच्छन्नास्ते । एतत् सर्वं विज्ञाय यथा कर्तव्यमनुष्ठीयतां । चक्रवाको विहस्याह । देव बकेन तावद्देशान्तरं गत्वा यथाशक्ति राजकार्यमनुष्ठितं । किंतु स्वभाव एष मूर्खाणां ।

यतः । शतं दद्यान्न विवदेदिति प्राज्ञस्य लक्षणं ।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणं ॥ ३२ ॥

राजाह । अलमतीतोपालम्भनेन । प्रस्तुतमनुसंधीयतां । चक्रवाको ब्रूते । देव विजने ब्रवीमि ।

यतः । वर्णाकारप्रतिध्वाननेत्रगात्रविकारतः ।
अभ्यूहन्ति मनस्तज्ज्ञास्तस्माद्रहसि मन्त्रयेत् ॥ ३३ ॥

ततो राज्ञा मन्त्री च तत्र स्थितौ । अन्येऽन्यत्र गताः । ततश्चक्रवाको ब्रूते । देव अहमेव जानामि कस्याप्यस्मन्नियोगिनः प्रेरणया बकेनेदमनुष्ठितं ।

यतः । वैद्यानामातुरः श्रेयान् व्यसनीशो नियोगिनां ।
विदुषां जीवनं मूर्खः सद्वन्द्वो नृपतेर्जनः ॥ ३४ ॥

राजाब्रवीत् । भवतु कारणमत्र पश्चान्निरूपणीयं । संप्रति यत् कर्तव्यं तद्ब्रूहि । चक्रवाको वदति । देव प्रणिधिस्तावद्गच्छतु । ततस्तदनुष्ठानं बलाबलं च जानीमः ।

तथा हि । भवेत् स्वपरराष्ट्राणां कार्याकार्यविलोकने ।
चारश्चक्षुर्महीभर्तुर्यस्य नास्त्यन्ध एव सः ॥ ३५ ॥

स च बको द्वितीयं विश्वासपात्रं गृहीत्वा यातु । तेनासौ स्वयं तत्रत्यकार्यमनुष्ठाय सुनिभृतं समुच्य द्वितीयं प्रस्थापयिष्यति ।

तथा ह्युक्तं ।

तीर्थाश्रमे सुरस्थाने शास्त्रविज्ञानहेतुना ।
तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवदेत् ॥ ३६ ॥

यश्चरश्च जले स्थले चरत्युभयवेतनो नान्यः कश्चित् । बक एव नियुज्यतां । तद्गृहलोकाश्च राजकुले तिष्ठन्तु । किंतु देवैस्तत्र सुगुप्तमनुष्ठातव्यं ।

यतः । षट्कर्णो भिद्यते मन्त्रस्तथा च प्राप्तवार्त्तया ।
इत्यात्मना द्वितीयेन मन्त्रः कार्यो महीभृता ॥ ३७ ॥

अपरं च पश्य । मन्त्रभेदेऽपि ये दोषाः संभवन्ति महीपतेः ।
न शक्यास्ते समाधातुमिति नीतिविदां मतं ॥ ३८ ॥

राजा विमृश्योवाच । प्राप्तस्तावन्मयोत्तमः प्रणिधिः । मन्त्री ब्रूते । देव तर्हि संग्रामे जयोऽपि प्राप्तः । अत्रान्तरे प्रतीहारः प्रविश्य प्रणम्योवाच । देव जम्बुद्वीपादागतो द्वारि शुकस्तिष्ठति । राजा चक्रवाकमवलोकयति । चक्रवाकेणोक्तं । कृतावासस्तावद्गत्वा भवतु पश्चाद्द्रष्टव्यः । यथाज्ञापयति देव इत्यभिधाय प्रतीहारः शुकं गृहीत्वागतः । राजाह । विग्रहस्तावदुपस्थितः । चक्रवाको ब्रूते । देव तथापि विग्रहो न विधिः ।

यतः । सचिवः किं स वा मन्त्री य आदावेव भूपतिं ।
युद्धोद्यमं स्वभूत्यागं निर्दिशत्यविचारितं ॥ ३९ ॥

अपरं च । साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
साधितुं प्रयतेतारीन् न युद्धेन कदाचन ॥ ४० ॥

यतः । सर्व एव जनः शूरो योऽनासादितविक्रमः ।
अदृष्टपरसामर्थ्यः सदर्पः को भवेन्न हि ॥ ४१ ॥

किं च । न तथोत्थाप्यते ग्रावा पाणिभिर्दारुणा यथा ।
अल्पोपायान्महासिद्धिरेतन्मन्त्रफलं महत् ॥ ४२ ॥

किंतु विग्रहमुपस्थितमवलोक्य व्यवह्रियतां ।

यतः । यथाकालं कृता यत्नात् कृषिः फलवती भवेत् ।
तद्वन्नीतिरियं चापि चिरात् फलति न क्षणात् ॥ ४३ ॥

अपरं च । महतो दूरभीरुत्वमासन्ने शूरता गुणः ।
विपत्तौ च महाँल्लोके धीरत्वमधिगच्छति ॥ ४४ ॥

अन्यच । प्रत्यूहः सर्वसिद्धीनामुत्तापः प्रथमं किल ।
अतिशीतलमप्यम्भः किं भिनत्ति न भूभृतः ॥ ४५ ॥

विशेषतश्च देव महाबलोऽसौ चित्रवर्णो राजा ।

यतः । बलिना सह योद्धव्यमिति नास्ति निदर्शनं ।
तद्युद्धं हस्तिना सार्द्धं नराणां पादमुद्धरेत् ॥ ४६ ॥

अन्यच्च । स मूर्खः कालमप्राप्य यो ऽपकर्तरि वर्तते ।
कलिर्बलवता सार्द्धं कीटपक्षोद्गमो यथा ॥ ४७ ॥

किं च । कौर्मं संकोचमास्थाय प्रहारमपि मर्षयेत् ।
प्राप्तकाले तु नीतिज्ञ उत्तिष्ठेत् क्रूरसर्पवत् ॥ ४८ ॥

शृणु देव । महत्यल्पे ऽप्युपायज्ञः सममेव भवेत् क्षमः ।
समुन्मूलयितुं वृक्षान् तृणानीव नदीरयः ॥ ४९ ॥

अतस्तद्दूतो ऽयं शुकः समाश्वास्य तावद्ध्रियतां यावद्दुर्गं सज्जीक्रियते ।

यतः । एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं शतसहस्राणि तस्माद्दुर्गं विशिष्यते ॥ ५० ॥

किं च । सदुर्गो विषयो यस्य नारेः परिभवास्पदं ।
अदुर्गविषयो राजा पोतच्युतमनुष्यवत् ॥ ५१ ॥

दुर्गं कुर्यान्महाखातमुच्चप्राकारगोपुरं ।
सयन्त्रालुजलं शैलसरिन्मरुवनाश्रयं ॥ ५२ ॥

विस्तीर्णतातिवैषम्यं यावसानीन्धनं गुहा ।
प्रवेशश्चापसारश्च सप्तैता दुर्गसंपदः ॥ ५३ ॥

राजाह । दुर्गानुसंधाने को नियुज्यतां । चक्रवाको ब्रूते ।

यो यत्र कुशलः कार्ये तं तत्र विनियोजयेत् ।
कर्मस्वदृष्टकर्मा यः शास्त्रज्ञो ऽपि स मुह्यति ॥ ५४ ॥

तदाहूयतां सारसः । तथानुष्ठिते सति आगतं सारसं समाश्वास्य राजोवाच । सारस त्वं सत्वरं दुर्गमनुसंधेहि । सारसः प्रणम्योवाच । देव दुर्गं

तावदिदमेव चिरात् सुनिरूपितमास्ते महत् सरः । किन्त्वेतन्मध्यवर्तिनि द्वीपे धान्यसंग्रहः क्रियतां ।

यतः । धान्यानां संग्रहो राजन्नुत्तमः सर्वसंग्रहात् ।
निक्षिप्तं हि मुखे रत्नं न कुर्यात् प्राणधारणं ॥ ५५ ॥

किं च । ख्यातः सर्वरसानां हि लवणो रस उत्तमः ।
गृह्णीयात् तं विना तेन व्यञ्जनं गोमयायते ॥ ५६ ॥

राजा तमाह । सत्वरं गत्वा सर्वमिदमनुष्ठीयतां । पुनः प्रविश्य प्रतीहारो ब्रूते । देव एष सिंहलद्वीपादागतो मेघवर्णो नाम वायसराजः सपरिवारः प्रणमति । देवपादं द्रष्टुमिच्छति । राजाह । काकः पुनः प्राज्ञो बहुदृष्टा च तद्भवति संग्राह्यः । चक्रवाक उवाच । देव अस्त्येवं किंतु काकः स्थलचरस्तेनास्मद्विपक्षैर्निक्षिप्तः कथं संगृह्यते ।

तथा चोक्तं । आत्मपक्षं परित्यज्य परपक्षेषु यो रतः ।
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥ ५७ ॥

Fab. VII. राजोवाच कथमेतत् । मन्त्री कथयति । अस्ति शृगालः कश्चित् । स स्वेच्छया नगरोपान्ते भ्राम्यन् नीलीभाण्डे निपतितः पश्चात् तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत् संदर्श्य स्थितः । अथ नीलीभाण्डस्वामिना तं शृगालमूर्द्धचरणं निमीलितनयनं दन्तनिष्काशितं दृष्ट्वा मृत इति मत्वा ग्रामाद्दूरं नीत्वासौ धृतः । ततोऽसौ वनं गत्वात्मानं नीलवर्णमवलोक्याचिन्तयत् । अहमिदानीमुत्तमवर्णस्तत् किमात्मोत्कर्षं न साधयामि । इत्यालोच्य शृगालान् आहूय तेनोक्तं । अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः । तत् पश्यत मम वर्णं तदद्यारभ्यास्मदाज्ञयास्मिन्नरण्ये व्यवहारः कार्यः । शृगालाश्च विशिष्टवर्णं तमवलोक्य साष्टाङ्गपातं प्रणम्योचुः ।

यथाज्ञापयति देव इति । ततोऽनेन क्रमेण सर्वेषु पशुष्वरण्यवर्तिष्वाधिपत्यं तस्याभवत् । तेन स्वज्ञातिभिरावृतेनाधिकं साधितं । ततस्तेन सिंहव्याघ्रादीन् उत्तमपरिजनान् प्राप्य शृगालान् अवलोक्य लज्जमानेनावज्ञया दूरीकृताः स्वज्ञातयः । ततो विषण्णान् शृगालान् अवलोक्य वृद्धशृगालेन केनचित् प्रतिज्ञातं । मा विषीदत एवं यावता नीतिज्ञेन वयं मर्मज्ञाः परिभूताः । तद्यथायं विनश्यति तन्मया विधेयं । यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते । तद्यथायं परिचीयते तथा कुरुत । तत्र चैवमनुष्ठीयतां । यदा सर्वे संध्यासमये तत्संनिधाने महारावमेकदैव करिष्यथ ततस्तं शब्दमाकर्ण्य स्वभावात् तेनापि शब्दः कर्तव्यः ।

यतः । यः स्वभावो हि यस्य स्यात् तस्यासौ दुरतिक्रमः ।
श्वा यदि क्रियते भोगी स किं नाश्नात्युपानहं ॥ ५८ ॥

ततः शब्दात् शृगालोऽयमित्यभिज्ञाय व्याघ्रेण हन्तव्यः । तथानुष्ठिते सति तद्वृत्तं ।

तथा चोक्तं । छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निजो रिपुः ।
दहत्यन्तर्गतश्चैव शुष्कवृक्षमिवानलः ॥ ५९ ॥

अतोऽहं ब्रवीमि आत्मपक्षं परित्यज्येत्यादि । राजाह । यद्यप्येवं स वायसस्तथाप्यसौ दूरादागत इति संदृश्यतां । ततः संगमे च यथार्हं विचार्य कार्यं कर्तव्यं । राजादेशो नातिक्रमणीय इति । चक्रवाकोऽवदत् । यथाज्ञापयति देव इत्यभिधाय बलमानीय यथोक्तराजदर्शनं कारयित्वा कृतावासे वासितः । ततो विग्रहे विचारः । तत्र चक्रवाको ब्रूते । देव प्रणिधिः प्रहितो दुर्गं च सज्जीकृतं । संप्रति शुकोऽप्यानीय प्रत्युत्तरं दत्वा प्रस्थाप्यतां । यतो देव अस्माकमपि चरा एवंविधेषु कर्मसु नियुज्यन्ते । — — — — —

तथा ह्युक्तं । नन्दं जघान चाणक्यस्तीक्ष्णदूतप्रयोगतः ।
तच्चरान्तरितं दूतं पश्येद्वीरसमन्वितः ॥ ६० ॥

ततो राजहंसेन सभां कृत्वा शुक आहूतः काकश्च । तत्र शुकः किंचिन्नतशिरा दत्तासने चोपविष्टो ब्रूते । भो भो हिरण्यगर्भ त्वां राजाधिराजः श्रीमच्चित्रवर्णः समाज्ञापयति । यदि जीवितेन श्रिया वा प्रयोजनमस्ति तदा सत्वरमागत्यास्मच्चरणौ प्रणम । नो चेदवस्थातुं स्थानान्तरं चिन्तय । राजा सकोपमाह । आः कोऽप्यस्माकं नास्ति । तत उत्थाय मेघवर्णो ब्रूते । देव आज्ञापय हन्मि तावदमुं दुष्टशुकं । सर्वज्ञो ब्रूते राजानं काकं च शान्त्वयन् । युवां तावत् शृणुतं ।

न सा सभा यत्र न सन्ति वृद्धा वृद्धा न ते ये न वदन्ति धर्मं ।
धर्मः स नो यत्र न सत्यमस्ति सत्यं न तद्यच्छलमभ्युपैति ॥ ६१ ॥

यतो धर्मो ह्येषः ।

दूतो म्लेच्छोऽप्यबध्यः स्याद्राजा दूतमुखो यतः ।
उद्यतेष्वपि शस्त्रेषु नृपते किं पुनर्द्विजः ॥ ६२ ॥

अन्यच्च । स्वकोत्कर्षं परोत्कर्षैर्दूतोक्तैर्मन्यते प्रभुः ।
सदैवाबध्यभावेन दूतः सर्वं हि जल्पति ॥ ६३ ॥

ततो राजा काकश्च प्रकृतिमापन्नौ । शुकश्चोत्थाय चलितः । पश्चाच्चक्रवाकेण प्रबोध्यानीय कनकालंकारादिकं दत्वा शुकः संप्रेषितः स्वदेशं ययौ । अथ शुको विन्ध्याचलं गत्वा राजानं प्रणतवान् । तमालोक्य स चित्रवर्णो राजोवाच । शुक का वार्त्ता कीदृशोऽसौ देशः । शुको ब्रूते । देव संक्षेपादियमेव वार्त्ता युद्धोद्योगः क्रियतां देशश्चासौ कर्पूरद्वीपः स्वर्गैकाङ्गः कथं वर्णयितुं शक्यते । ततः सर्वान् आहूय राजा मन्त्रयितुमुपविष्ट आह । संप्रति कर्तव्यविग्रहे यथाकर्तव्योपदेशं ब्रूत । विग्रहः पुनरवश्यं कर्तव्यः ।

तथा ह्युक्तं । असंतुष्टा द्विजा नष्टाः संतुष्टा इव पार्थिवाः ।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः ॥ ६४ ॥

ततो दूरदर्शी नाम मन्त्री गृध्रो ब्रूते । देव व्यसनितया विग्रहो न विधिः ।

यतः । मित्रामात्यसहायाश्च यदा स्युर्दृढभक्तयः ।
शत्रूणां विपरीतं च कर्तव्यो विग्रहस्तदा ॥ ६५ ॥

अन्यच्च । भूमिर्मित्रं हिरण्यं च विग्रहस्य फलं त्रयं ।
यदैतन्निश्चितं भावि कर्तव्यो विग्रहस्तदा ॥ ६६ ॥

राजाह । मम बलानि तावदवलोकयतु मन्त्री । तदैतेषामुपयोगो वर्तनदानेन क्रियतां । तदाहूयतां मौहूर्तिकः । निर्णीय शुभलग्नं यात्रार्थं ददातु । मन्त्री वदति । तथापि देव सहसा यात्राकरणमनुचितं ।

यतः । विशन्ति सहसा मूढा ये ऽविचार्य द्विषद्बलं ।
खड्गधारापरिष्वङ्गं लभन्ते ते सुनिश्चितं ॥ ६७ ॥

राजोवाच । मन्त्रिन् ममोत्साहभङ्गं सर्वथा मा कृथाः । विजिगीषवो यथा परभूमिमाक्रमन्ति तत् कथय । गृध्रो ऽब्रवीत् । देव कथयामि किंतु तदप्यनुष्ठितमेव फलप्रदं ।

तथा चोक्तं । किं मन्त्रेणाननुष्ठाने शास्त्रवत् पृथिवीपतेः ।
न ह्यौषधपरिज्ञानाद्व्याधेः शान्तिः क्वचिद्भवेत् ॥ ६८ ॥

राजादेशश्चानतिक्रमणीय इति यथा श्रुतं निवेदयामि । शृणु देव ।

नद्यद्रिवनदुर्गेषु यत्र यत्र भयं भवेत् ।
तत्र तत्र च सेनानीर्यायाद्व्यूहीकृतैर्बलैः ॥ ६९ ॥
बलाध्यक्षः पुरो यायात् प्रवीरपुरुषान्वितः ।
मध्ये कलत्रं स्वामी च कोषो फल्गु च यद्बलं ॥ ७० ॥

पार्श्वयोरुभयोरश्वा अश्वानां पार्श्वयो रथाः ।
रथानां पार्श्वयोर्नागा नागानां च पदातयः ॥ ७१ ॥
पश्चात् सेनापतिर्यायात् खिन्नान् आश्वासयन् शनैः ।
मन्त्रिभिः स्वभटैर्युक्तः प्रतिव्यूहबलैर्नृपः ॥ ७२ ॥
समेयाद्विषमं नागैर्जलाढ्यं समहीधरं ।
सममश्वैर्जलं नौभिः सर्वत्रैव पदातिभिः ॥ ७३ ॥
हस्तिनां गमनं प्रोक्तं प्रशस्तं जलदागमे ।
तदन्यत्र तुरंगाणां पत्तीनां सर्वदैव हि ॥ ७४ ॥
वनेषु दुर्गमार्गेषु विधेयं नृपरक्षणं ।
स्वयोधै रक्षितस्यापि स्वपनं योगिनिद्रया ॥ ७५ ॥
नाशयेत् कर्षयेच्छत्रून् दुर्गकण्टकमर्दनैः ।
परदेशप्रवेशे च कुर्यादाटविकां पुरः ॥ ७६ ॥
यत्र राजा तत्र कोषो विना कोषं न राजता ।
स्वभटेभ्यस्ततो दद्यात् को हि दत्ते न युध्यति ॥ ७७ ॥
न नरस्य नरो दासः किंतु द्रव्यस्य भूपते ।
गौरवं लाघवं वापि धनाधननिबन्धनं ॥ ७८ ॥
अभेदेन च युध्येत बलं रक्षेत् परस्परं ।
फल्गु सैन्यं च यत् किंचिन्मध्ये व्यूहस्य कारयेत् ॥ ७९ ॥
पदातींश्च महीपालः पुरोऽनीकस्य योजयेत् ।
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ॥ ८० ॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले ॥ ८१ ॥

दूषयेच्चास्य सततं यवसान्नोदकेन्धनं ।
भिन्द्याच्चैव तडागानि प्राकारान् परिखास्तथा ॥ ८२ ॥
बलेषु प्रमुखो हस्ती न तथान्यो महीपतेः ।
निजैरवयवैरेव मातंगोऽष्टायुधः स्मृतः ॥ ८३ ॥
बलमश्वश्च सैन्यानां प्राकारो जंगमो यतः ।
तस्मादश्वाधिको राजा विजयी स्थलविग्रहे ॥ ८४ ॥
युध्यमाना हयारूढा देवानामपि दुर्जयाः ।
अपि दूरस्थितास्तेषां वैरिणो हस्तवर्तिनः ॥ ८५ ॥
प्रथमं युद्धकारित्वं समस्तबलपालनं ।
दिङ्मार्गाणां विशोधित्वं पत्तिकर्म प्रचक्ष्यते ॥ ८६ ॥
स्वभावशूरमस्त्रज्ञमविरक्तं जितश्रमं ।
प्रसिद्धक्षत्रियप्रायं बलं श्रेष्ठतमं विदुः ॥ ८७ ॥
यथा प्रभुकृतान्मानाद्युध्यते भुवि मानवैः ।
न तथा बहुभिर्दत्तैर्द्रविणैरपि भूपतेः ॥ ८८ ॥
वरमल्पबलं सारं न बह्वी मुण्डमालिका ।
कुर्यादसारभङ्गो हि सारभङ्गमपि स्फुटं ॥ ८९ ॥
अप्रसादोऽनधिष्ठानं देयांशहरणं च यत् ।
कालयापोऽप्रतीकारस्तद्वैराग्यस्य कारणं ॥ ९० ॥
अपीडयन् बलं शत्रून् जिगीषुरतिषिलयेत् ।
सुखं साध्यं द्विषां सैन्यं दीर्घयानप्रपीडितं ॥ ९१ ॥
दायाददपरो यौज्यो न ह्यस्त्याकर्षणे द्विषां ।
तस्मादुत्थापयेद्यत्नाद्दायादं तस्य विद्विषः ॥ ९२ ॥

संधाय युवराजेन यदिवा मुख्यमन्त्रिणा ।
अन्तःप्रकोपनं कार्यमभियोक्तुः स्थिरात्मनः ॥ १३ ॥
* द्वेष्यं मित्रवलैश्चापि भङ्गं दत्वाभिघातयेत् ।
अथवाणग्रहाकृष्या तच्छल्यस्यातिबन्धनात् ॥ १४ ॥
स्वराष्ट्रं वासयेद्राज्ञा परदेशापवाहनात् ।
अथवा दानमानाभ्यां वासितं धनदं हि तत् ॥ १५ ॥

राजाह । आः किं बहुनोदितेन ।

आत्मोदयः परग्लानिर्द्वयं नीतिरितीयती ।
तद्दूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतीयते ॥ १६ ॥

शुको विहस्य । सर्वमेतदुच्यते । किंतु ।

अन्यदुच्छृङ्खलं सत्वमन्यच्छास्त्रनियन्त्रितं ।
समानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥ १७ ॥

तत उत्थाय राजा मौहूर्तिकावेदितलग्ने प्रस्थितः । अथ तत्र प्रहितःप्रणिधिर्हिरण्यगर्भमागत्योवाच । देव समागतप्रायो राजा चित्रवर्णः । संप्रति मलयपर्वतोपत्यकायां समावासितकटको वर्तते । दुर्गशोधनं प्रतिक्षणमनुसंधातव्यं । यतो ऽसौ गृध्रो महामन्त्री । किंत्वेतस्य विश्वासकथाप्रसङ्गेनैतदिङ्गितेनावगतं मया यदेतेन को ऽप्यस्मद्दुर्गे प्रागेव नियुक्तः । ततश्चक्रवाको ब्रूते । देव काक एवासौ संभवति । राजाह । न कदाचिदेतत् । यद्येवं तदा कथं तेन शुकस्याभिभवायोद्योगः कृतः । अपरं च शुकस्यागमनात् तत्र विग्रहोत्साहः । स चिरादत्रास्ते । मन्त्री वदति । तथाप्यागन्तुः सदैव शङ्कनीयः । राजाह । आगन्तवो ऽपि कदाचिदुपकारका दृश्यन्ते । शृणु ।

परोऽपि हितवान् बन्धुर्बन्धुरप्यहितः परः ।
अहितो देहजो व्याधिर्हितमारण्यमौषधं ॥ ९८ ॥

अपरं च । आसीद्वीरवरो नाम शूद्रकस्य महीभुजः ।
सेवकः स्वल्पकालेन स ददौ सुतमात्मनः ॥ ९९ ॥

Fab. VIII. चक्रवाकः पृच्छति कथमेतत् । राजा कथयति । अहं पुरा शूद्रकस्य राज्ञः क्रीडासरसि कर्पूरकेलिनाम्नो राजहंसस्य पुत्र्या कर्पूरमञ्जर्या सहानुरागवान् अभवं । तत्र वीरवरो नाम राजपुत्रः कुतश्चिद्देशादागत्य राजद्वारि प्रतीहारमुपगम्योवाच । अहं वर्तनार्थी राजपुत्रः । मां राजदर्शनं कारय । ततस्तेनासौ राजदर्शनं कारितो ब्रूते । देव यदि मया सेवकेन प्रयोजनमस्ति तदास्मद्वर्तनं क्रियतां । शूद्रक उवाच । किं ते वर्तनं । वीरवरोऽवदत् । प्रत्यहं टङ्कशतचतुष्टयं । राजाह का ते सामग्री । स आह । द्वौ बाहू तृतीयश्च खड्गः । राजोवाच । नैतद्दातुं शक्यं । एतच्छ्रुत्वा वीरवरः प्रणम्य चलितः । अथ मन्त्रिभिरुक्तं । देव दिनचतुष्टयस्य वर्तनं दत्वा ज्ञायतामस्य स्वरूपं किमुपयुक्तोऽयमेतावद्वर्तनं गृह्णात्यथानुपयुक्तो वा । ततस्तद्वचनादाहूय वीरवरस्य ताम्बूलं दत्वा टङ्कशतचतुष्टयं दत्तवान् । तद्विनियोगश्च राज्ञा सुनिरूपितः । तत्रार्द्धं देवेभ्यो ब्राह्मणेभ्यो दत्तं तेन । अपरार्द्धं च दुःखिभ्यस्तदवशिष्टं च भोजनव्ययेन व्ययितं । तथैव तत् सर्वं नित्यकृत्यं च कृत्वा स राजद्वारमहर्निशं खड्गपाणिः सेवते यदा च राजा स्वयं समादिशति तदा स्वगृहमुपयाति । अथ चतुर्थ्यां रात्रौ निशीथे स राजा क्रन्दनध्वनिं शुश्राव । तं श्रुत्वा शूद्रको ब्रूते । कः कोऽत्र द्वारि । तेनोक्तं । देव अहं वीरवरः । राजोवाच । क्रन्दनानुसरणं क्रियतां । वीरवरोऽपि यदाज्ञापयति देव इत्युक्त्वा चलितः । ततो राज्ञा चिन्तितं । नैतदुचितं कृतं यदयं राजपुत्रः सूचीभेद्ये

तमसि प्रेषितः । तदहमपि गत्वा किमेतदिति निरूपयामि । ततो राजापि खड्गमादाय तदनुसरणक्रमेण नगराद्वहिर्निर्जगाम । तत्र गत्वा च वीरवरेण काचित् स्त्री रुदती रूपयौवनसंपन्ना सर्वालंकारभूषिता विलोकिता पृष्टा च । का त्वं किमर्थं रोदिषीति । ततस्तयोक्तं । अहमेतस्य शूद्रकस्य राज्ञो लक्ष्मीश्चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता इदानीं चान्यत्र गमिष्यामि । वीरवरो ब्रूते । कथं पुनरिहावलम्बनं भगवत्याः संभवति । लक्ष्मीरुवाच । यदि त्वमात्मनः पुत्रं शक्तिवरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः सर्वमङ्गलाया उपहारीकरोषि तदाहं पुनरत्र सुचिरं सुखेन निवसामि । इत्युक्त्वा सादृश्याभवत् । ततो वीरवरेण स्वगृहं गत्वा निद्रावधूतः पुत्रः प्रबोधितः पत्नी च । तौ निद्रां परित्यज्योत्थायोपविष्टौ वीरवरश्च तयोः समक्षं तत् सर्वं लक्ष्मीवचनमुक्तवान् । तच्छ्रुत्वा सानन्दं शक्तिवरो ब्रूते । धन्योऽहमेवंभूतः स्वामिराज्यरक्षायां यस्योपयोगः । तत् तावत् कोऽधुना विलम्बनहेतुः । कदापि तावदेवंविधे कर्मण्येतस्य देहस्य विनियोगः श्लाघ्यः । शक्तिवरमातोवाच । अस्मत्कुलोचितं यद्येतन्न कर्तव्यं तत् केनान्येन कर्मणामुष्य महावर्तनस्य निष्क्रयो भविष्यति । इत्यालोच्य सर्वे सर्वमङ्गलायतनं गताः । तत्र सर्वमङ्गलां संपूज्य वीरवरो ब्रूते । देवि प्रसीद विजयतां शूद्रको राजा गृह्यतामयमुपहारः । इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद । अथ वीरवरश्चिन्तयामास । गृहीतराजवर्तनस्य तावन्निस्तारो भूतः । अधुनापुत्रस्य जीवनं विडम्बनं । इत्यालोच्यात्मनोऽपि शिरश्छिन्नवान् । ततः स्त्रियापि स्वामिनः पुत्रस्य च शोकार्त्तया तथैवानुष्ठितं । तत् सर्वं श्रुत्वा दृष्ट्वा च साश्चर्यं स राजा चिन्तयामास ।

जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः ।
अनेन सदृशो लोके न भूतो न भविष्यति ॥ १०० ॥

तदेतत्परित्यक्तेन राज्येन न मे प्रयोजनमस्ति । इति शूद्रकेण स्वशिरश्छेत्तुमुन्नामितः खड्गः । अथ साक्षान्मूर्तिमत्या सर्वमङ्गलया राजा हस्ते धृत उक्तं च । पुत्र अलं साहसेन । इदानीं तव राज्यभङ्गो नास्ति । राजा साष्टाङ्गपातं प्रणम्योवाच । देवि किं मे राज्येन जीवितेन वा प्रयोजनमस्ति । यदि ममानुकम्पा विद्यते तदायं वीरवरः सपुत्रदारो जीवतु । अन्यथाहं यथाप्राप्तिं गतिं गच्छामि । भगवत्युवाच । अनेन सत्त्वोत्कर्षेण भृत्यवात्सल्येन च सर्वसंतुष्टास्मि । इदानीं गच्छ विजयी भव । अयमपि सदारपुत्रो जीवतु राजपुत्रः । इत्युक्त्वा देव्यदृश्याभवत् । राजा तां प्रणम्यालक्षितश्चलितः प्रासादगर्भं गत्वा सुप्तः । वीरवरोऽपि सपुत्रदारः प्राप्तजीवनः स्वगृहं गतः । अथ पुनर्द्वारस्थो वीरवरो भूपालेन पृष्टः सन्नुवाच । देव सा रुदती स्त्री मामालोक्यादृश्याभवत् । न काप्यन्या विद्यते वार्त्ता । ततस्तद्वचनमाकर्ण्य संतुष्टो राजाचिन्तयत् । कथमयं श्लाघ्यतां महासत्त्वः ।

यतः । प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः ।
दाता नापात्रवर्षी च प्रगल्भः स्यादनिष्ठुरः ॥ १०१ ॥

एतन्महापुरुषलक्षणमेतस्मिन् सर्वमस्ति । ततः स राजा प्रातः शिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादत्वेन तस्य कर्णाटराज्यं ददौ । तत् किमागन्तुको जातिमात्राद्दुष्टः । तत्राप्युत्तमाधममध्यमाः संभवन्ति ।

चक्रवाको ब्रूते ।

योऽकार्यं कार्यवच्छास्ति स किं मन्त्री नृपेच्छया ।
वरं स्वामिमनोदुःखं तन्नाशो न त्वकार्यतः ॥ १०२ ॥
वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदाः ।
शरीरधर्मकोषेभ्यः क्षिप्रं स परिहीयते ॥ १०३ ॥

शृणु देव । पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति ।
हत्वा भिक्षुमतो मोहान्निध्यर्थी नापितो हतः ॥ १०४ ॥

Fab. IX. राजा पृच्छति कथमेतत् । मन्त्री कथयति । अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः । तेन धनार्थं महता क्लेशेन भगवांश्चन्द्रार्धचूडामणिराराधितः । ततः प्रक्षीणपापो भगवतो दर्शनं स्वप्ने प्राप्तवान् । अथ भगवतः प्रसादाद्यक्षेश्वरेणादिष्टं । त्वमद्य प्रातः क्षौरं कृत्वा लगुडहस्तः स्वगृहद्वारि सुनिभृतं स्थास्यसि । ततः समागतं भिक्षुं प्राङ्गणे यं द्रक्ष्यसि तमेव निर्दयं लगुडेन हनिष्यसि । ततः स भिक्षुः सुवर्णपरिपूर्णकलशो भविष्यति । तेनैव त्वया स्वेच्छया यावज्जीवं सुखिना भवितव्यं । तदनन्तरं तथानुष्ठिते सति तद्वृत्तं । तच्च क्षौरकरणानीतनापितेनालोक्य चिन्तितं । अये निधिप्राप्तेरयमुपायः । तदहमप्येवं किं न करोमि । ततः प्रभृति स नापितः प्रतिदिनं तथाविधानो लगुडहस्तः प्रातः सुनिभृतं भिक्षोरागमनं प्रतीक्षते । एकदा तेन तथा प्राप्तो भिक्षुर्लगुडेन हत्वा व्यापादितः । तस्मादपराधात् सोऽपि नापितो राजपुरुषैस्ताडितः पञ्चत्वमगमत् । अतोऽहं ब्रवीमि पुण्याल्लब्धं यदेकेन इत्यादि । राजाह ।

पुरावृत्तकथोद्गारैः कथं निर्णीयते परः ।
स्याच्च निष्कारणो बन्धुरुत विश्वासघातकः ॥ १०५ ॥

यातु प्रस्तुतमनुष्ठीयतां । मलयाधित्यकायां चित्रवर्णस्तदधुना किं विधेयं । मन्त्री वदति । देव आयातप्रणिधिमुखात् श्रुतं मया यन्महामन्त्रिणो गृध्रस्योपदेशे चित्रवर्णेनानादरः कृतः । अतो मूढोऽसौ जेतुं शक्यश्च भवति ।

यतः । लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखच्छेद्यो रिपुः स्मृतः ॥ १०६ ॥

अतो यावदेवायमस्मद्दुर्गावरोधं न विदधाति तावन्नद्यद्रिवनवर्त्मसु तद्बलानि हन्तुं सारसादयः सेनापतयो नियोज्यन्तां ।

तथा चोक्तं । दीर्घवर्त्मपरिश्रान्तं नद्यद्रिवनसंकुलं ।
घोराग्निभयसंत्रस्तं क्षुत्पिपासार्दितं तथा ॥ १०७ ॥
प्रमत्तं भोजनव्यग्रं व्याधिदुर्भिक्षपीडितं ।
असुस्थितमभूयिष्ठं वृष्टिवातसमाकुलं ॥ १०८ ॥
पङ्कपांशुजलच्छिन्नं सुव्यस्तं दस्युविद्रुतं ।
एवंभूतं महीपालः परसैन्यं विघातयेत् ॥ १०९ ॥
अवस्कन्दभयाद्राजा प्रजागरकृतश्रमं ।
दिवासुप्तं सदा हन्यान्निद्राव्याकुलसैनिकं ॥ ११० ॥

अतस्ते तस्य प्रमादिनो बलं गत्वा यथावकाशं दिवारात्रौ घ्नन्तु । तथानुष्ठिते चित्रवर्णसैन्यानि बहवः सेनापतयश्च निहताः । ततश्चित्रवर्णो विषण्णः स्वमन्त्रिणं दूरदर्शिनमाह । तात किमस्मदुपेक्षा क्रियते किं वाप्यविनयो ममास्ति ।

तथा ह्युक्तं । न राज्यं प्राप्तमित्येवं वर्तितव्यमसांप्रतं ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमं ॥ १११ ॥

अन्यच्च । दक्षः श्रियमधिगच्छति पथ्याशी कल्यतां सुखमरोगी ।
उद्युक्तो विद्यान्तं धर्मार्थयशांसि च विनीतः ॥ ११२ ॥

गृध्रो वदति । देव ।
अविद्वान् अपि भूपालो विद्यावृद्धोपसेवया ।
परां छायामवाप्नोति जलासन्नतरुर्यथा ॥ ११३ ॥

अन्यच्च । पानं स्त्री मृगया द्यूतमर्थदूषणमेव च ।
वाग्दण्डयोश्च पारुष्यं व्यसनानि महीभृतां ॥ ११४ ॥

न साहसैकान्तरसानुवर्तिना न चाप्युपायोपहतान्तरात्मना ।
विभूतयः शक्यतमाः समीहितुं नये च शौर्ये च वसन्ति संपदः ॥

त्वया च स्वबलोत्साहमवलोक्य साहसैकरसिकेन मया समुपन्यस्तेष्वपि मन्त्रेष्ववज्ञानं वाक्पारुष्यं च कृतं । अतो दुर्णीतेः फलमिदमनुभूयते । तथा चोक्तं । दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः ।
संतापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः ।
कं स्वीकृता न विषयाः परितापयन्ति ॥ ११६ ॥

ततो मयाप्यालोचितं । प्रज्ञाहीनोऽयं राजा । नो चेत् कथं नीतिशास्त्रकथाकौमुदीं वागुल्काभिस्तिमिरयति ।

यतः । यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किं ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ ११७ ॥

तेनाहमपि तूष्णीं स्थितः । राजा बद्धाञ्जलिराह । तात अस्त्ययं ममापराधः । इदानीमवशिष्टबलोऽपि प्रत्यावृत्याहतो विन्ध्याचलं यथा गच्छामि तथोपदिश । गृध्रः स्वगतं चिन्तयति । क्रियतामत्र प्रतीकारः ।

यतः । देवतासु गुरौ गोषु राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा कोपो बालवृद्धातुरेषु च ॥ ११८ ॥

विहस्य ब्रूते च । मा भैषीः समाश्वसिहि ।

शृणु देव । मन्त्रिणां भिन्नसंधाने भिषजां सान्निपातिके ।
कर्मणि व्यज्यते प्रज्ञा सुस्थे को वा न पण्डितः ॥ ११९ ॥

अपरं च । आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति ते ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥ १२० ॥

तदितस्तव प्रतापादेव दुर्गं त्यक्त्वा कीर्तिप्रतापबलसहितं त्वामचिरेण कालेन विन्ध्याचलं नयामि । राजाह । कथममुना स्वल्पबलेनैतत् संपत्स्यते । गृध्रो वदति । देव सर्वं भविष्यति यतो विजिगीषोरदीर्घसूत्रता विजयसिद्धिरवश्यं भाविनी तदद्य दुर्गावरोधो विधीयतां । अथ प्रहितप्रणिधिना बकेनागत्य हिरण्यगर्भस्य तत् कथितं । देव स्वल्पबलोऽयं राजा चित्रवर्णो गृध्रस्य मन्त्रोपस्तम्भादागत्य दुर्गावरोधं करिष्यति । राजहंसो ब्रूते । सर्वज्ञ किमधुना विधेयं । चक्रवाको वदति । दुर्गद्वारबले सारासारः क्रियतां । स्वर्णवस्त्रादिकं दत्त्वा यथार्हं प्रसाददानं विधीयतां ।

यतः । यः काकिनीमप्यपथप्रपन्नामन्विष्यते निष्कसहस्रतुल्यां ।
स्थानेषु कोटिष्वपि मुक्तहस्तस्तं राजसिंहं न जहाति लक्ष्मीः ॥

अन्यच्च । क्रतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मित्रसंग्रहे ।
प्रियासु नारीष्वधनेषु बान्धवेष्वतिव्ययो नास्ति नराधिपाष्टसु ॥

यतः । मूर्खः स्वल्पव्ययत्रासात् सर्वनाशं करोति हि ।
कः सुधीः संत्यजेद्भाण्डं शुल्कस्यैवातिसाध्वसात् ॥ १२३ ॥

राजाह । कथमिहसमये ऽतिव्ययो युज्यते । उक्तं च आपदर्थे धनं रक्षेदिति । मन्त्री ब्रूते । श्रीमतः कथमापदः । राजाह । कदाचित् कुप्यते लक्ष्मीः । मन्त्री पुनर्वदति । संचितार्थो विनश्यति तद्देव कार्पण्यं परित्यज्य स्वभटा दानमानाभ्यां पुरस्क्रियन्तां ।

तथा चोक्तं । परस्परज्ञाः संतुष्टास्त्यक्तुं प्राणान् सुनिश्चिताः ।
कुलीनाः पूजिताः सम्यग्विजयन्ते द्विषां बलं ॥ १२४ ॥

अपरं च । संहताः शीलसंपन्नाः संभृताः कृतनिश्चयाः ।
अपि पञ्चाशतः शूरा निघ्नन्ति रिपुवाहिनीं ॥ १२५ ॥

किं च । शिष्टैरप्यविशेषज्ञ उग्रश्च कृतनाशकः ।
त्यज्यते किं पुनर्नान्यैर्बध्वा धन्वन्तरिर्यथा ॥ १२६ ॥
सत्यं शौर्यं तथा त्यागो नृपस्यैते महागुणाः ।
एतैर्मुक्तो महीपालः प्राप्नोति खलु वाच्यतां ॥ १२७ ॥

अमात्यास्तावदवश्यं पुरस्कर्तव्याः । तथा चोक्तं ।

यो येन प्रतिबद्धः स्यात् सह तेनोदयव्ययी ।
स विश्वस्तो नियोक्तव्यः प्राणेषु च धनेषु च ॥ १२८ ॥
न शृणोति वचो यस्तु मन्त्रिणः स महीपतिः ।
अनीतिपवनक्षिप्तः कार्याब्धौ संप्रलीयते ॥ १२९ ॥

पश्य देव । हर्षक्रोधौ यतौ यस्य कोषः स्वल्पव्ययेन च ।
नित्यं भृत्यानुपेक्षा च तस्य स्याद्धनदा धरा ॥ १३० ॥
येषां राज्ञा सह स्यातामुपचयापचयौ ध्रुवं ।
तेऽमात्या इति तान् लब्धा नावमन्येत् कदाचन ॥ १३१ ॥

यतः । महीभृतो मदान्धस्य मज्जतः कार्यसागरे ।
स्खलतो हि करालम्बः सुहृत्सचिवचेष्टितं ॥ १३२ ॥

अथागत्य प्रणम्य मेघवर्णो ब्रूते । देव दृष्टिप्रसादं कुरु । एष युद्धार्थी विपक्षो दुर्गद्वारि । तद्देवपादादेशाद्बहिर्निःसृत्य स्वविक्रमं दर्शयामि तेन देवपादानामानृण्यमुपगच्छामि । चक्रवाको ब्रूते । मा मैवं यदि बहिर्निःसृत्य योद्धव्यं तदा दुर्गाश्रयणं निष्प्रयोजनं ।

विषमो हि यथा नक्रः सलिलान्निःसृतोऽवशः ।
वनाद्विनिर्गतः सत्यं सिंहोऽपि स्यात् शृगालवत् ॥ १३३ ॥

देव स्वयं गत्वा दृश्यतां युद्धं ।

यतः । पुरस्कृत्य बलं राजा योधान् समवलोकयेत् ।
स्वामिनाधिष्ठितः श्वापि किं न सिंहायते ध्रुवं ॥ १३४ ॥

अनन्तरं ते सर्वे दुर्गद्वारं गत्वा महाहवं कृतवन्तः । अपरेद्युश्चित्रवर्णो राजा गृध्रमुवाच । तात स्वप्रतिज्ञातमधुना निर्वाहय । गृध्रो वदति । शृणु तावत् ।

अकालसहमत्यल्पं मूर्खव्यसनिनायकं ।
अगुप्तं भीरुयोधं च दुर्गव्यसनमुच्यते ॥ १३५ ॥

तत् तावदत्र नास्ति । उपजापश्चिरारोधो ऽवस्कन्दस्तीव्रपौरुषः ।
दुर्गस्य लङ्घनोपायाश्चत्वारः कथिता इमे ॥ १३६ ॥

अत्र च यथाशक्ति क्रियतां यत्नः । कर्णे कथयत्येवमेव । ततो ऽनुदित एव भास्करे चतुर्ष्वपि द्वारेषु वृत्ते समरे दुर्गाभ्यन्तरगृहेषु मेघवर्णकाकैरेव तदाग्निर्निक्षिप्तः । ततो गृहीतं गृहीतं दुर्गमिति कोलाहलं श्रुत्वानेकगृहेषु प्रदीप्तं पावकं प्रत्यक्षेणावलोक्य राजहंसस्य सैनिका अन्ये च दुर्गवासिनः सत्वरं ह्रदं प्रविष्टाः ।

यतः । सुमन्त्रितं सुविक्रान्तं सुयुद्धं सुपलायितं ।
प्राप्तकालं यथाशक्ति प्रकुर्यान्न विचारयेत् ॥ १३७ ॥

राजहंसः सुखिस्वभावान्मन्दगतिः सारसद्वितीयश्चित्रवर्णस्य सेनापतिना कुक्कुटेनागत्य वेष्टितः । हिरण्यगर्भो राजा ब्रूते । सेनापते सारस ममानुरोधादात्मानं न व्यापादयिष्यसि । गन्तुं त्वमधुनापि समर्थः । तद्गत्वा जलं प्रविश्यास्मत्पुत्रं चूडारत्ननामानं सर्वज्ञस्य संमत्या राजानं कारयिष्यसि । सारसो ब्रूते । देव न वक्तव्यमेवं दुःसहं वचः । चन्द्रार्कौ यावत् तावद्विजयतां देव । अहं पुनरेव दुर्गाधिकारी । तन्मम मांसासृग्लिप्तेन दुर्गद्वारेण प्रविशतु शत्रुः । देव ।

क्षमी दाता गुणग्राही स्वामी दुःखेन लभ्यते ।

राजाह । अस्त्येवमपि ।

शुचिर्दक्षो ऽनुरक्तश्च मन्ये भृत्यो ऽपि दुर्लभः ॥ १३८ ॥

सारसः । देव अन्यच्च शृणु ।

यदि समरमपास्य नास्ति मृत्योर्भयमिति युक्तमितो ऽन्यतः प्रयातुं ।
अथ मरणमवश्यमेव जन्तोः किमिति मुधा मलिनं यशः क्रियेत ॥ १३९ ॥

अन्यच्च । भवे ऽस्मिन् पवनोद्भ्रान्तवीचिविभ्रमभंगुरे ।
जायते पुण्ययोगेन परार्थे जीवितव्ययः ॥ १४० ॥

त्वं च देव स्वामी सर्वदा रक्षणीयः ।

यतः । प्रकृतिः स्वामिना त्यक्ता समृद्धापि न जीवति ।
अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि ॥ १४१ ॥

तथा हि । नरेश्वरे जगत् सर्वं निमीलति निमीलति ।
सूर्योदय इवाम्भोजं तत्प्रबोधे प्रबुध्यते ॥ १४२ ॥

अपि च । स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोषो बलं सुहृत् ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयो ऽपि च ॥ १४३ ॥

अत्रापि प्रधानाङ्गं राजा । अथ कुक्कुटेनागत्य राजहंसस्य शरीरे नखमुखाघातः कृतः । ततः सत्वरमुपसृत्य सारसेन स्वदेहान्तरितो राजा । अनन्तरं कुक्कुटनखमुखप्रहारैर्जर्जरीकृतेन सारसेन स्वाङ्गेनाच्छाद्य राजा जले क्षिप्तः । कुक्कुटः सेनापतेरपि चञ्चुप्रहारेण व्यापादितः । पश्चाद्बहुभिः पक्षिभिः संभूय सारसो व्यापादितः । अथ चित्रवर्णो राजा दुर्गं प्रविश्य तदवस्थितद्रव्यं ग्राहयित्वा वन्दिभिर्जयशब्देनानन्दितः स्वस्कन्धावारं जगाम ।

राजपुत्रैरुक्तं । तस्मिन् राजहंसबले पुण्यवान् असौ सारस एव येनैवं स्वदेहदानेन स्वामी रक्षितः ।

यतः । जनयन्ति सुतान् गावः सर्वान् एव गवाकृतीन् ।
विषाणोन्नामितस्कन्धं काचिदेव गवां पतिं ॥ १४४ ॥

विष्णुशर्मणोक्तं । स तावत् स्वसत्त्वक्रीतान् नक्षत्रलोकान् प्राप्य विद्याधरीपरिजनसमन्वितः स्वर्गसुखमनुभवतु महासत्त्वः ।

तथा चोक्तं । आहवेषु च ये शूराः स्वाम्यर्थे त्यक्तजीविताः ।
भर्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः ॥ १४५ ॥

अन्यच्च । यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयाँल्लभते लोकान् यदि क्लैव्यं न गच्छति ॥ १४६ ॥

अपरमप्येवमस्तु ।
विग्रहः करितुरंगपत्तिभिर्नो कदापि भवतां महीभृतां ।
नीतिमन्त्रपवनैः समाहताः संश्रयन्तु गिरिगह्वरं द्विषः ॥१४७॥

इति हितोपदेशे विग्रहो नाम तृतीयः
कथासंग्रहः समाप्तः ॥

॥ ३ ॥

LIBER QUARTUS.

अथ विष्णुशर्मणोक्तं । विग्रहस्तावत् कथितः । संधिरधुना विधीयते यस्यायमाद्यः श्लोकः ।

वृत्ते महति संग्रामे राज्ञोर्निहतसेनयोः ।
स्थेयाभ्यां गृध्रचक्राभ्यां वाचा संधिः कृतः क्षणात् ॥ १ ॥

Fab. I. राजपुत्रा ऊचुः कथमेतत् । विष्णुशर्मा कथयति । ततस्तेन हंसेनोक्तं । केनायमस्मद्दुर्गे निक्षिप्तो ऽग्निः । किं पारक्येण किं वास्मद्दुर्गवासिना केनापि विपक्षप्रयुक्तेन । चक्रवाक उवाच । देव मेघवर्णो नाम वायसराजः सपरिवारो नावलोक्यते । तन्मन्ये तस्यैतद्विचेष्टितं । राजा क्षणं विचिन्त्याह । अस्ति तावदेवं किंतु मम दुर्दैवमेतत् ।

तथा चोक्तं । अपराधः स दैवस्य न पुनः शूरमानिनः ।
कार्यमुद्घाटितं क्वापि मध्ये विघटते यतः ॥ २ ॥

मन्त्री ब्रूते । उक्तमेवैतत् ।

विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्मदोषं च नैव जानात्यपण्डितः ॥ ३ ॥

अपरं च । सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥ ४ ॥

Fab. II. राजाह कथमेतत् । मन्त्री कथयति । अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः । तत्र चिराद्धंसौ निवसतः । तयोर्मित्रं कूर्मश्च प्रतिवसति । अथ धीवरैरागत्य तत्रोक्तं यदद्यास्माभिरत्रोषित्वा प्रातः कूर्ममत्स्यादयो व्यापादयितव्याः । तदाकर्ण्य कूर्मो हंसावाह । सुहृदौ श्रुतोऽयं धीवरालापः । अधुना किं मया विधातव्यं । हंसावाहतुः । ज्ञायतां पुनस्तावत् प्रातर्यदुचितं तत् कर्तव्यं । कूर्मो ब्रूते । मा मैवं । यतो दृष्टव्यतिकरोऽहमत्र ।

तथा चोक्तं । अनागतविधाता च प्रत्युत्पन्नमतिस्तथा ।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥ ५ ॥

Fab. III. तावाहतुः कथमेतत् । कूर्मः कथयति । पुरैतस्मिन्नेव सरस्येवंविधेष्वेव धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितं । तत्रैकोऽनागतविधातृनामा मत्स्यः । तेनोक्तं । अहं पुनर्जलाशयान्तरं तावद्गच्छामि । इत्युक्त्वा ह्रदान्तरं गतः । अपरेण च प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितं । भाविन्यर्थे प्रमाणाभावात् कुत्र किं समाधातव्यं तदुत्पन्नकार्ये कार्यमनुष्ठेयं ।

तथा चोक्तं । उत्पन्नामापदं यस्तु समाधत्ते स बुद्धिमान् ।
वणिजो भार्यया जारः प्रत्यक्षे निह्नुतो यथा ॥ ६ ॥

Fab. IV. यद्भविष्यः पृच्छति कथमेतत् । प्रत्युत्पन्नमतिः कथयति । अस्ति विक्रमपुरे समुद्रदत्तनामा वणिक् तस्य रत्नप्रभा नाम वधूः केनापि स्वसेवकेन सह सदा रमते । अथैकदा सा तस्य सेवकस्य मुखे चुम्बनं ददती समुद्रदत्तेनावलोकिता । ततश्च बन्धकी सा सत्वरं भर्तुः समीपमुपगम्याह । नाथ एतस्य सेवकस्य तावन्महती निर्वृतिः । यतो युष्मदर्थं नीयमानं कर्पूरमश्नाति । कर्पूरगन्धो मयास्य मुखे प्रत्यक्षेणाघ्रातः । तच्छ्रुत्वा सेवकेनापि प्रकुप्योक्तं । यस्य गृहस्यैतादृशी चेष्टा तत्र सेवकेन कथं स्थातव्यं यत्र प्रतिक्षणं गृहिणी

सेवकस्य मुखं जिघ्रति । ततो ऽसावुत्थाय चलितः सन् साधुना प्रबोध्यानीय यत्नाद्धृतः । अतो ऽहं ब्रवीमि उत्पन्नामापदमित्यादि । ततो यद्भविष्येणोक्तं । यद्भावि न तद्भावीत्यादि । अथ प्रातर्जालेन बद्धः सन् प्रत्युत्पन्नमतिर्मृतवदात्मानं प्रदर्श्य स्थितः । ततो जालादपसारितो यथाशक्त्युत्प्लुत्य गभीरं नीरं प्रविष्टः । यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः । अतो ऽहं ब्रवीमि अनागतविधातेत्यादि । तद्यथाहमन्यह्रदं प्राप्नोमि तथा क्रियतां । हंसावाहतुः । स्थले गच्छतस्तव कुतः कुशलं । कूर्मो ब्रूते । यथाहमपि भवद्भ्यां सहाकाशवर्त्मना गच्छामि स उपायो विधीयतां । हंसौ ब्रूतः । कथं संभवत्येष उपायः । सो ऽब्रवीत् । युवाभ्यां चञ्च्वा काष्ठमेकं धर्तव्यं । अहं तस्मिन् काष्ठखण्डे मुखेनावलम्बनं कृत्वा भवतोः पक्षबलेन गमिष्यामि । हंसावाहतुः । संभवत्येष उपायः ।

किंतु । उपायं चिन्तयन् प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो वकमूर्खस्य नकुलैर्भक्षिताः प्रजाः ॥ ७ ॥

Fab. V. कूर्मः पृच्छति कथमेतत् । हंसौ कथयतः । अस्त्युत्तरापथे गृध्रकूटो नाम गिरिः । तत्रैरावतीतीरे न्यग्रोधे वका निवसन्ति । तस्यैव च वृक्षस्याधस्ताद्विवरे सर्पस्तिष्ठति । स च तेषां बालापत्यानि खादति । ततः शोकार्त्तानां वकानां प्रलापं श्रुत्वा केनचिद्वृद्धवकेनोक्तं । एवं कुरुत यूयं मत्स्यान् आनीय नकुलविवरादारभ्य सर्पविवरं यावत् पंक्तिक्रमेणैकैकशो मत्स्यान् धत्त । ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावद्वेषाद्व्यापादयितव्यश्च । तथानुष्ठिते तद्वृत्तं । अथ तैर्नकुलैस्तत्र वृक्षे वकशावकारावः श्रुतः । पश्चात् तैर्वृक्षमारुह्य शावकाः सर्व एव व्यापादिताः । अत आवां ब्रूव उपायं चिन्तयन्नित्यादि । एवमावाभ्यां च नीयमानं त्वामवलोक्य लोकैः किंचिद्वक्तव्यमेव ।

तदाकर्ण्य यदा त्वमुत्तरं ददासि तदा त्वन्मरणं खलु । तत् सर्वथेहैव स्थीयतां । कूर्मो ब्रूते । किमहमप्राज्ञः । न किमपि मया वक्तव्यं । तथानुष्ठिते तथाविधं कूर्ममवलोक्य सर्वे गोरक्षकाः पश्चाद्धावन्ति वदन्ति च । तत्र कश्चिद्वदति । यद्ययं कूर्मः पतति तदात्रैव पक्का भोक्तव्यः । कश्चिद्वदति । गृहं नेतव्यः । ततस्तत् परुषवचनं श्रुत्वा स कूर्मः क्रोधाद्विस्मृतपूर्वसंस्कारोऽथ तान् अवदत् । युष्माभिर्भस्म भक्षितव्यमिति वदन्नपतदेव । पतितस्तैः प्राप्तो व्यापादितश्च । अतोऽहं ब्रवीमि सुहृदां हितकामानामित्यादि । अथ प्रणिधिः प्राक् प्रहितो बक आगत्य तमुवाच । देव प्रागेव मया निवेदितं यद्दुर्गशोधनं प्रतिक्षणं कर्तव्यमिति तच्च युष्माभिर्न कृतं । अथ तस्यानवधानस्य फलमिदमागतं दुर्गदाहश्चायं मेघवर्णनाम्ना वायसेन गृध्रप्रयुक्तेन कृतः । राजा निःश्वस्याह ।

प्रणयादुपकाराद्वा यो विश्वसिति शत्रुषु ।
प्रसुप्त इव वृक्षाग्रे पतितः प्रतिबुध्यते ॥ ८ ॥

प्रणिधिरुवाच । इतो दुर्गदाहं विधाय यदागतो मेघवर्णस्तदा चित्रवर्णेन प्रसादितेनोक्तं । अयं मेघवर्णोऽत्र कर्पूरद्वीपराज्येऽभिषिच्यतां ।

तथा चोक्तं । कृतकृत्यस्य भृत्यस्य कृतं नैव प्रणाशयेत् ।
फलेन मनसा वाचा दृष्ट्या चैनं प्रहर्षयेत् ॥ ९ ॥

चक्रवाको ब्रूते । देव श्रुतं यत् प्रणिधिः कथयति । राजाह । ततस्ततः । प्रणिधिरुवाच । ततः प्रधानमन्त्रिणा गृध्रेणोक्तं । देव नेदमुचितं प्रसादान्तरं क्रियतां ।

यतः । अधिकारेण यो युक्तः कथं तस्यास्ति खण्डनं ।
नीचेषूपकृतं राजन् बालुकास्विव मुद्रितं ॥ १० ॥

अपरं च । महतामास्पदे नीचः कदापि न हि युज्यते ।
न हि चूडामणिस्थाने पादुका कैश्चिदिष्यते ॥ ११ ॥
तथा चोक्तं । नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति ।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥ १२ ॥

Fab. VI. चित्रवर्णः पृच्छति कथमेतत् । दूरदर्शी कथयति । अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः । तेनाश्रमसंनिधाने मूषिकशावकः श्येनमुखाद्भ्रष्टो दृष्टः । पश्चाद्दयालुना मुनिना नीवारकणैः स पालितः । तं च मूषिकं खादितुं यत्नादन्विषन् विडालो मुनिना दृष्टः । ततस्तेन तपःप्रभावान्मूषिको विडालः कृतः । स च कुक्कुराद्बिभेति । ततोऽसौ विडालः कुक्कुरः कृतः । कुक्कुरस्य च व्याघ्राद्भयं महत् । तदनन्तरं स कुक्कुरो व्याघ्रः कृतः । अथ व्याघ्रमपि तं मुनिर्मूषिकनिर्विशेषेण पश्यति । तं च मुनिं दृष्ट्वा सर्वे वदन्ति । अनेन मुनिना मूषिकोऽयं व्याघ्रतां नीतः । एतच्छ्रुत्वा व्याघ्रः सव्यथोऽचिन्तयत् । यावदनेन मुनिना जीवितव्यं तावदिदं स्वरूपाख्यानं ममाकीर्तिकरं न पलायिष्यते । इत्यालोच्य मुनिं हन्तुमुद्यतः । ततो मुनिना तज्ज्ञात्वा पुनर्मूषिको भव इत्युक्त्वा मूषिक एव कृतः । अतोऽहं ब्रवीमि नीचः श्लाघ्यपदं प्राप्य इत्यादि । अपरं च देव सुकरमपि नैतत् । शृणु । भक्षयित्वा बहून् मत्स्यान् उत्तमाधममध्यमान् ।
अतिलौल्याद्बकः पश्चान्मृतः कर्कटसंग्रहात् ॥ १३ ॥

Fab. VII. चित्रवर्णः पृच्छति कथमेतत् । गृध्रो कथयति । अस्ति मालवविषये पद्मगर्भाभिधानं सरस्तत्रैको वृद्धबकः सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः । स च केनचित् कुलीरेण दूरादेव दृष्टः पृष्टश्च । किमिति भवान् आहारपरित्यागेन तिष्ठति । बकेनोक्तं । मत्स्या मम जीवनहेतवस्ते चाव-

श्यमत्र कैवर्त्तैर्व्यापादयितव्याः । इति नगरोपान्ते पर्यालोचना मयाकर्णिता । ततो वर्तनाभावादस्मन्मरणमुपस्थितं । इति ज्ञात्वाहमाहारे ऽपि मन्दादरः कृतः । तच्छ्रुत्वा सर्वैर्मत्स्यैरालोचितं । इहसमये तावदुपकारक एवास्माकमिति लक्ष्यते । तदयमेव यथा कर्तव्यं पृच्छ्यतां ।

तथा चोक्तं । उपकर्त्रारिणा संधिर्न मित्रेणापकारिणा ।
उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥ १४ ॥

मत्स्या ऊचुः । कोऽत्र रक्षणोपायः । वको ब्रूते । अस्ति रक्षाहेतुर्जलाशयान्तरगमनं तत्राहं युष्मान् नयामि । मत्स्यैरपि भयादुक्तं । एवमस्तु । ततोऽसौ दुष्टवको मत्स्यांस्तान् एकैकशो नीत्वाभक्षयत् । अनन्तरं कुलीरः कश्चित् तमुवाच । भो वक मामपि तत्र नय । ततो वकोऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीतवान् । अथ वकेन नीतः स्थले स धृतः । कुलीरो मत्स्यकङ्कालाकीर्णं भूतलमवलोक्याचिन्तयत् । हा हतोऽस्मि मन्दभाग्यः । भवतु । इदानीं समयोचितं व्यवहरामि । इत्यालोच्य यदासौ ग्रीवां प्रसार्य तं हन्तुमुद्यतस्तदैवासौ कुलीरः करेण तस्य वकस्य ग्रीवां चिच्छेद । अतोऽहं ब्रवीमि भक्षयित्वा बहून् मत्स्यान् इत्यादि । ततः स पुनश्चित्रवर्णो राजाब्रवीत् । शृणु तावन्मन्त्रिन् मयैतदालोचितमस्ति यदत्रावस्थितेन मेघवर्णेन राज्ञा यावन्ति कर्पूरद्वीपस्योत्तमद्रव्याणि तान्यस्माकमुपनेतव्यानि । तेन च महता विलासेनास्माभिर्विन्ध्याचले स्थातव्यं । दूरदर्शी विहस्याह । देव ।

अनागतवतीं चिन्तां कृत्वा यस्तु प्रहृष्यति ।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥ १५ ॥

Fab. VIII. राजाह कथमेतत् । मन्त्री कथयति । अस्ति देवीकोट्टनगरे देवशर्मा नाम ब्राह्मणः । तेन विषुवसमये शक्तुभूतः शराव एकः प्राप्तः । ततस्तमादायासौ

भाण्डपूर्णकुम्भकारमण्डपिकैकदेशे शय्यानिक्षिप्तदेहः सन् रात्रावचिन्तयत् । यद्यहमिमं शक्तुशरावं विक्रीय दश कपर्दकान् प्राप्नोमि तदा तैरिहसमये शरावांस्ततो घटादीन् उपक्रीय विक्रीयानेकधा वृद्धैर्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय लक्षसंख्यानि धनान्युत्पाद्य विवाहचतुष्टयं करोमि । ततस्तासु पत्नीषु याधिकरूपवती तस्यामधिकानुरागं करोमि । अनन्तरं जातेर्ष्यास्तत्सपत्न्यो यदा द्वन्द्वं कुर्वन्ति तदा कोपाकुलोऽहं ताः पत्नीर्लगुडेनेत्थं ताडयामि । इत्यभिधायोत्थाय तेन लगुडः क्षिप्तः । अतः शक्तुशरावश्चूर्णितो भाण्डानि च बहूनि भग्नानि । ततो भाण्डभङ्गशब्देनागतकुम्भकारेण तद्दृष्ट्वा स ब्राह्मणस्तिरस्कृतो मण्डपिकागर्भाद्बहिष्कृतः । अतोऽहं ब्रवीमि अनागतवतीं चिन्तामित्यादि । ततो राजा रहसि गृध्रमपृच्छत् । तात यथा कर्तव्यमुपदिश । गृध्रो ब्रूते । मदोद्धतस्य नृपतेः संकीर्णस्येव दन्तिनः ।

गच्छन्त्युन्मार्गयातस्य नेतारः खलु वाच्यतां ॥ १६ ॥

शृणु तावद्देव किमस्माभिर्बलदर्पादिदं दुर्गं भग्नं न वा भवत्प्रतापाधिष्ठितेनोपायेन । राजाह । भवतामुपायेन । गृध्रो ब्रूते । यद्यस्मद्वचनं क्रियते तदा स्वदेशो गम्यतेऽधुना । अन्यथा प्रत्यासन्ने वर्षाकाले तुल्यबलेनानेन सहास्माकं परभूमिष्ठानां पुनर्विग्रहे सति स्वदेशगमनमपि दुर्लभं भविष्यति । सुखशोभानुरूपं संधाय गम्यतां । दुर्गभङ्गकीर्तिस्तु लब्धैव । मम संमतं तावदेतत् ।

यतः । यो हि धर्मं पुरस्कृत्य हित्वा भर्तुः प्रियाप्रिये ।
अप्रियाण्याह तथ्यानि तेन राजा सहायवान् ॥ १७ ॥

अन्यच्च । सुहृद्बलं तथा राज्यमात्मानं कीर्तिमेव च ।
युधि संदेहदोलास्थं को हि कुर्यादबालिशः ॥ १८ ॥

अपरं च । संधिमिच्छेत् समेनापि संदिग्धो विजयो युधि ।
न हि संशयितुं कुर्यादित्युवाच बृहस्पतिः ॥ १९ ॥
युद्धे विनाशो भवति कदाचिदुभयोरपि ।
सुन्दोपसुन्दावन्योन्यं समवीर्यौ हतौ न किं ॥ २० ॥

Fab. IX. राजोवाच कथमेतत् । मन्त्री कथयति । पुरा दैत्यौ महोदारौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्यराज्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ । ततस्तयोर्भगवान् परितुष्टः सन् वरं वरयतमित्युवाच । अनन्तरं तयोर्भीरुमययोः समादिष्टया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहितवन्तौ । यद्यावयोर्भगवान् परितुष्टस्तदा स्वप्रियां पार्वतीं परमेश्वरो ददातु । अथ भगवता क्रुद्धेन वरप्रदानस्यावश्यकतया विचारमूढयोः पार्वती प्रदत्ता । ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पापतिमिराभ्यां ममेत्यन्योन्यकलहाभ्यां प्रमाणपुरुषः कश्चित् पृच्छतामिति मतौ कृतायां स एव भर्ता वृद्धद्विजरूपी समागत्य तत्रोपस्थितः । अनन्तरमावाभ्यामियं स्वबललब्धा कस्येयमावयोर्भवतीति ब्राह्मणमपृच्छतां । ब्राह्मणो ब्रूते ।

वर्णश्रेष्ठो द्विजः पूज्यः क्षत्रियो बलवान् अपि ।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥ २१ ॥

तद्युवाभ्यां क्षत्रधर्मो ऽनुगन्तव्यः । युद्ध एव युवयोर्नियमः । इत्यभिहिते सति साधूक्तमनेनेत्युक्त्वान्योन्यतुल्यवीर्यौ समकाले ऽन्योन्यघातेन विनाशमुपगतौ । अतो ऽहं ब्रवीमि संधिमिच्छेत् समेनापीत्यादि । राजाह । प्रागेव किं नेदमुक्तं भवद्भिः । मन्त्री वदति । तदा किं मम वचनं पर्यवसानपर्यन्तमवगतं युष्माभिः । तदापि मम संमत्या नायं विग्रहारम्भः । यतः संधेयगुणो ऽयं हिरण्यगर्भो न विग्राह्यश्च ।

तथा चोक्तं । सत्यार्यधार्मिकानार्यभ्रातृसंघातवान् बली ।
अनेकयुद्धविजयी संधेयाः सप्त कीर्तिताः ॥ २२ ॥
सत्यो ऽनुपालयन् सत्यं संधितो नैति विक्रियां ।
प्राणरोधे ऽपि सुव्यक्तमार्यो नायात्यनार्यतां ॥ २३ ॥
धार्मिकस्याभियुक्तस्य सर्व एव हि युध्यते ।
प्रजानुरागाद्धर्माच्च दुःखहेयो हि धार्मिकः ॥ २४ ॥
संधिः कार्यो ऽप्यनार्येण विनाशे समुपस्थिते ।
विना तस्याश्रयेणान्यः कुर्वाणः कालयापनं ॥ २५ ॥
संहतत्वाद्यथा वेणुर्निविडः कण्टकैर्वृतः ।
न शक्यते समुच्छेत्तुं भ्रातृसंघातवांस्तथा ॥ २६ ॥
बलिना सह योद्धव्यमिति नास्ति निदर्शनं ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥ २७ ॥
जमदग्नेः सुतस्येव सर्वः सर्वत्र सर्वदा ।
अनेकयुद्धजयिनः प्रतापादेव भुज्यते ॥ २८ ॥
अनेकयुद्धविजयी संधानं यस्य गच्छति ।
तत्प्रतापेन तस्याशु वशं गच्छन्ति विद्विषः ॥ २९ ॥

तदत्र बहुभिर्गुणैरुपेतः संधेयो ऽयं राजा ।
(ततश्चित्रवर्णगृध्रयोः संवादं प्रणिधिमुखाच्छ्रुत्वा) चक्रवाको ऽवदत् । सर्वमवगतं भो वक व्रज त्वं तद्विशेषविधिं पुनर्ज्ञात्वागमिष्यसि । अथ हिरण्यगर्भश्चक्रवाकं पृष्टवान् । मन्त्रिन् असंधेयाः कति । तान् अपि श्रोतुमिच्छामि ।
मन्त्री ब्रूते । देव कथयामि ।

बालो वृद्धो दीर्घरोगस्तथा ज्ञातिबहिष्कृतः ।
भीरुको भीलुकजनो लुब्धो लुब्धजनस्तथा ॥ ३० ॥
विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् ।
अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ ३१ ॥
दैवोपहतकश्चैव दैवचिन्तक एव च ।
दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः ॥ ३२ ॥
अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च न ।
सत्यधर्मव्यपेतश्च विंशतिः पुरुषा इमे ॥ ३३ ॥
एतैः संधिं न कुर्वीत विगृह्णीयात् तु केवलं ।
एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशं ॥ ३४ ॥
बालस्याल्पप्रभावत्वान्न लोको योद्धुमिच्छति ।
युद्धायुद्धफलं यस्माद्दातुं शक्तो न बालिशः ॥ ३५ ॥
उत्साहशक्तिहीनत्वाद्वृद्धो दीर्घामयस्तथा ।
स्वैरेव परिभूयेते द्वावप्येतावसंशयं ॥ ३६ ॥
सुखच्छेद्यो हि भवति सर्वज्ञातिबहिष्कृतः ।
त एवैनं विनिघ्नन्ति ज्ञातयस्त्वात्मसात्कृताः ॥ ३७ ॥
भीरुर्युद्धपरित्यागात् स्वयमेवापगच्छति ।
वीरोऽप्यवीरपुरुषः संग्रामे तैर्विमुच्यते ॥ ३८ ॥
लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुजीविनः ।
लुब्धानुजीवी तैरेव दानभिन्नैर्निहन्यते ॥ ३९ ॥
संत्यज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधि ।
सुखाभियोग्यो भवति विषयेष्वतिसक्तिमान् ॥ ४० ॥

अनेकचित्तमन्त्रश्च द्वेष्यो भवति मन्त्रिणां ।
अनवस्थितचित्तत्वात् कार्ये तैः स उपेक्ष्यते ॥ ४१ ॥
सदा धर्मबलीयस्त्वाद्देवब्राह्मणनिन्दकः ।
विशीर्यते स्वयं ह्येष दैवोपहतकस्तथा ॥ ४२ ॥
संपत्तेश्च विपत्तेश्च दैवमेव हि कारणं ।
इति दैवपरो ध्यायन्नात्मना न विचेष्टते ॥ ४३ ॥
दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति ।
बलव्यसनयुक्तस्य योद्धुं शक्तिर्न विद्यते ॥ ४४ ॥
अदेशस्थो हि रिपुणा स्वल्पकेनापि बाध्यते ।
ग्राहो ऽल्पीयान् अपि जले गजेन्द्रमपि कर्षति ॥ ४५ ॥
बहुशत्रुस्तु संत्रस्तः श्येनमध्ये कपोतवत् ।
येनैव गच्छति पथा तेनैवासौ विपद्यते ॥ ४६ ॥
अकालसैन्ययुक्तस्तु हन्यते कालयोधिना ।
कौशिकेन हतज्योतिर्निशीथ इव वायसः ॥ ४७ ॥
सत्यधर्मव्यपेतेन न संदध्यात् कदाचन ।
स संधितो ऽप्यसाधुत्वादचिराद्याति विक्रियां ॥ ४८ ॥

अपरमपि कथयामि। संधिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यं। कर्मणामारम्भोपायः पुरुषद्रव्यसंपद् देशकालविभागो विनिपातप्रतीकारः कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः। सामदानभेददण्डाश्चत्वार उपायाः। उत्साहशक्तिर्मन्त्रशक्तिः प्रभुशक्तिश्चेति शक्तित्रयं। एतत् सर्वमालोच्य नीत्या विजिगीषवो भवन्ति महान्तः ।

यतः । या हि प्राणपरित्यागमूल्येनापि न लभ्यते ।
सा श्रीर्नीतिविदां वेश्म चञ्चलापि प्रधावति ॥ ४९ ॥

तथा चोक्तं । वित्तं यदा यस्य च संविभक्तं गूढश्च चारो निभृतश्च मन्त्रः ।
न चाप्रियं प्राणिषु यो ब्रवीति स सागरान्तां पृथिवीं प्रशास्ति ॥

किंतु देव यद्यपि गृध्रेण महामन्त्रिणा संधानमुपन्यस्तं तथापि तेन राज्ञा संप्रति भूतजयदर्पान्नानुमन्तव्यं । तदेवं क्रियतां । अस्मन्मित्रं सिंहलद्वीपस्य महाबलो नाम सारसो राजा जम्बुद्वीपे कोपं जनयतु ।

यतः । सुगुप्तिमाधाय सुसंहतेन बलेन वीरो विचरन्नरातिं ।
संतापयेद्येन समं सुतप्तस्तप्तेन संधानमुपैति तप्तः ॥ ५१ ॥

ततो राज्ञा एवमस्त्वित्युक्त्वा विचित्रो नाम बकः सुगुप्तं लेखं दत्त्वा सिंहलद्वीपं प्रस्थापितः । अथ प्रणिधिः पुनरागत्योवाच । देव श्रूयतां तत्रत्यप्रस्तावः । एवं तत्र गृध्रेणोक्तं । देव मेघवर्णस्तत्र चिरमुषितः स वेत्ति किं संधेयगुणो हिरण्यगर्भो राजा न वेति । ततोऽसौ मेघवर्णश्चित्रवर्णेन राज्ञा समाहूय पृष्टः । कीदृशोऽसौ हिरण्यगर्भो राजा चक्रवाको मन्त्री वा । मेघवर्ण उवाच देव स हिरण्यगर्भो राजा युधिष्ठिरसमो महाशयः सत्यवाक् । चक्रवाकसदृशश्च मन्त्री न क्वाप्यवलोक्यते । राजोवाच । यद्येवं तदा कथमसौ त्वया वञ्चितः । मेघवर्णो ब्रूते । शृणु देव तेन मन्त्रिणाहं प्रथमदर्शने विज्ञातः । किंतु महाशयोऽसौ राजा । तेन मया विप्रलब्धः ।

तथा चोक्तं । आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनं ।
स तथा वंच्यते धूर्तैर्ब्राह्मणश्छागतो यथा ॥ ५२ ॥

Fab. X. राजाह कथमेतत् । मेघवर्णः कथयति । अस्ति गौतमारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे कृत्वा गच्छन्

धूर्तत्रयेणावलोकितः । ततस्ते धूर्ता यद्येष छागः केनाप्युपायेन प्राप्य खाद्यते तदा मतिप्रकर्षो भवतीत्यालोच्य प्रान्तरे वृक्षत्रयतले ब्राह्मणस्य वर्त्मन्युपविश्य स्थिताः । तत्रैकेन धूर्तेन स ब्राह्मणो गच्छन्नभिहितः । भो ब्राह्मण किमिति त्वया कुक्कुरः स्कन्धेनोह्यते । ब्राह्मणो ब्रूते नायं श्वा यज्ञछागोऽयं । अनन्तरं पुनर्द्वितीयेन क्रोशमात्रावस्थितेन तदेवोक्तं । तदाकर्ण्य ब्राह्मणस्तं छागं भूमौ निधाय मुहुर्मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः ।

यतः । मतिर्दोलायते नूनं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितो यः स म्रियते चित्रकर्णवत् ॥ ५३ ॥

Fab. XI. राजा पृच्छति कथमेतत् । स कथयति । अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः । तस्यानुचरास्त्रयः काको व्याघ्रः शृगालश्च । अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्ट उष्ट्रो दृष्टः पृष्टश्च । कुतो भवान् आगतः । स चात्मवृत्तान्तमकथयत् । तैश्च नीत्वा सिंहे समर्पितः । तेन चाभयवाचं दत्वा चित्रकर्ण इति नाम कृत्वा स्थापितः । अथ कदाचित् सिंहस्य शरीरवैकल्याद्भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्याकुला बभूवुः । ततः काकव्याघ्रगोमायुभिरालोचितं । चित्रकर्णमेव यथा स्वामी व्यापादयति तथानुष्ठीयतां । किमनेन कण्टकभुजास्माकं । व्याघ्रो ब्रूते । स्वामिनाभयवाचं दत्वा स्वीकृतः । तत् कथमेवं संभवति । वायसो वदति । इहसमये परिक्षीणः स्वामी पापमपि करिष्यति । यतः । त्यजेत् क्षुधार्त्ता महिलापि पुत्रं खादेत् क्षुधार्त्ता भुजगी स्वमण्डं ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥ ५४ ॥

अन्यच्च । मत्तः प्रमत्त उन्मत्तो श्रान्तः क्रुद्धो बुभुक्षितः ।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मवित् ॥ ५५ ॥

इति निश्चित्य सर्वे सिंहान्तिकं जग्मुः । सिंहेनोक्तं । आहारार्थं प्राप्तं किंचित् । काको ब्रूते । देव यत्नादपि न किंचित् प्राप्तं । सिंहोऽवदत् । कोऽधुना जीवनोपायः । काको वदति । स्वाधीनाहारपरित्यागेन सर्वनाशोऽयमुपस्थितः । सिंहोऽब्रवीत् । अत्राहारः कः स्वाधीनः । काकः कर्णे कथयति चित्रकर्ण इति । सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति ब्रूते च । मयैतस्य प्रागभयवाक् प्रदत्ता तत् कथमिदानीमेवं संभवति । तथा चोक्तं ।

न गोप्रदानं न महीप्रदानं न चान्नदानं न तथाम्बुदानं ।
यथा वदन्तीह महाप्रदानं सर्वप्रदानेष्वभयप्रदानं ।। ५६ ।।

अन्यच्च । सर्वकामसमृद्धस्य अश्वमेधस्य यत् फलं ।
तत् फलं समवाप्नोति रक्षिते शरणागते ।। ५७ ।।

काको ब्रूते । नासौ स्वामिना व्यापादयितव्यः । किं तु वयमेव तथा कुर्मो यथासौ स्वयमेव देहदानमङ्गीकरोति । तच्छ्रुत्वा सिंहस्तूष्णीं स्थितः । ततोऽसौ लब्धावकाशः स्फुटं कृत्वा सर्वान् गृहीत्वा सिंहसमीपं गतः । अथ काकेनोक्तं । देव यत्नादप्याहारो न प्राप्तः । अनेकोपवासक्लिष्टः स्वामी तत् सर्वथा मदीयमांसमुपभुज्यतां ।

यतः । स्वामिमूला भवन्त्येताः सर्वाः प्रकृतयः खलु ।
समूलेषु हि वृक्षेषु प्रयत्नः सफलो नृणां ।। ५८ ।।

सिंहेनोक्तं । भद्र वरं प्राणपरित्यागो न पुनरीदृशी वृत्तिः । ततो जम्बुकेनापि तथोक्तं । ततः सिंहेनोक्तं । आस्तां मा मैवं । व्याघ्र उवाच । मद्देहेन जीवतु स्वामी । सिंहेनोक्तं । न कदाचिदेवमुचितं । अथ चित्रकर्णोऽपि जातप्रत्ययस्तथात्मदेहदानमाह । ततस्तद्वदन्नेव व्याघ्रेण कुक्षिं विदार्य व्यापादितः सर्वैर्भक्षितश्च । अतोऽहं ब्रवीमि मतिर्दोलायते नूनमित्यादि ।

तदनन्तरं पुनर्गच्छन् स ब्राह्मणस्तृतीयेन धूर्तेनोक्तः । भो ब्राह्मण किमिति कुक्कुरं स्कन्धेन भवान् वहति । तदाकर्ण्य निश्चितमेवायं कुक्कुर इति मत्वा छागं त्यक्त्वा स्नात्वा स्वगृहं ययौ । स छागो नीत्वा धूर्तैर्भक्षितः । अतोऽहं ब्रवीमि आत्मौपम्येन यो वेत्तीत्यादि । राजाह । मेघवर्ण कथं त्वया शत्रुमध्ये चिरमुषितं कथं वा तेषामनुनयः कृतः । मेघवर्ण उवाच । देव स्वामिकार्यार्थिना स्वप्रयोजनवशाद्वा किं किं न क्रियते ।

पश्य । लोको वहति किं राजन् न मूर्ध्ना दग्धुमिन्धनं ।
क्षालयन्नपि वृक्षांघ्रीन् नदीवेगो निकृन्तति ॥ ५९ ॥

तथा चोक्तं । स्कन्धेनापि वहेच्छत्रून् कार्यमासाद्य बुद्धिमान् ।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः ॥ ६० ॥

Fab. XII. राजाह कथमेतत् । मेघवर्णः कथयति । अस्ति जीर्णोद्याने मन्दविषनामा सर्पः । सोऽतिजीर्णतया स्वाहारमुत्पादयितुमसमर्थः सरस्तीरे पतित्वा स्थितः । ततो दूरान्मण्डूकेन केनचिद्दृष्टः पृष्टश्च । किं स्वाहारं नान्विष्यसि । सर्पो ब्रूते । भद्र गच्छ किं ते मम मन्दभाग्यस्य वृत्तान्तप्रश्नेन । स चोपजातकौतुकः सर्वथा कथ्यतामिति तं सर्पमाह । सर्पो ब्रूते । अत्र ब्रह्मपुरे कौण्डिल्यनाम्नः श्रोत्रियस्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसंपन्नो दुर्दैववान् मया नृशंसेन दष्टः । सुशीलनामानं तं पुत्रं मृतमवलोक्य कौण्डिल्यः शोकमूर्छितः सन् पतितः पृथिवीतले लुलोठ । अनन्तरं ब्रह्मपुरनिवासिनः सर्वे बान्धवास्तस्य तत्रागत्योपविष्टाः । तत्र कपिलो नाम स्नातको ऽवदत् । अरे कौण्डिल्य मूढोऽसि तेनैवं विलपसि ।

शृणु । क्रोडीकरोति प्रथमं यथा जातमनित्यता ।
धात्रीव जननी पश्चात् तदा शोकस्य कः क्रमः ॥ ६१ ॥

क्व गताः पृथिवीपालाः ससैन्यबलवाहनाः ।
वियोगसाक्षिणी येषां भूमिरद्यापि तिष्ठति ॥ ६२ ॥
अपरं च । प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते ।
आमकुम्भ इवाम्भःस्थः शीर्णसंधिर्विभाव्यते ॥ ६३ ॥
आसन्नतरतामेति जन्तोर्मृत्युर्दिने दिने ।
आघातं नीयमानस्य बध्यस्येव पदे पदे ॥ ६४ ॥
अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ।
ऐश्वर्यं प्रियसंवासो मुह्येत् तत्र न पण्डितः ॥ ६५ ॥
यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥ ६६ ॥
यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति ।
विश्रम्य च पुनर्गच्छेत् तद्वद्भूतसमागमः ॥ ६७ ॥
पञ्चभिः संभृते देहे पञ्चत्वं च पुनर्गते ।
स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना ॥ ६८ ॥
यावतः कुरुते जन्तुः संबन्धान् मनसः प्रियान् ।
तावन्तोऽस्य निखन्यन्ते हृदये शोकशङ्कवः ॥ ६९ ॥
नायमत्यन्तसंवासः लभ्यते येन केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥ ७० ॥
संसारे कदलीस्तम्भे निःसारे सारमार्गणं ।
यः करोति स संमूढो जलबुद्बुदसंनिभे ॥ ७१ ॥
संयोगो हि वियोगस्य संसूचयति संभवं ।
अनतिक्रमणीयस्य जन्म मृत्योरिवागमं ॥ ७२ ॥

आपातरमणीयानां संयोगानां प्रियैः सह ।
अपत्यानामिवास्वानां परिणामो हि दारुणः ॥ ७३ ॥
शोचमानास्तु सस्नेहा बान्धवाः सुहृदस्तथा ।
पातयन्ति स्म तं स्वर्गादश्रुपातेन राघव ॥ ७४ ॥
व्रजन्ति न निवर्तन्ते स्रोतांसि सरितां यथा ।
आयुरादाय मर्त्यानां तथा रात्र्यहनी सदा ॥ ७५ ॥
सुखास्वादलवो यस्तु संसारे सत्समागमः ।
स वियोगावसानत्वाद्दुःखानां सुवि युज्यते ॥ ७६ ॥
अत एव हि नेच्छन्ति साधवः सत्समागमं ।
यद्वियोगासिलूनस्य मनसो नास्ति भेषजं ॥ ७७ ॥
सुकृतान्यपि कर्माणि राजभिः सगरादिभिः ।
अथ तान्येव कर्माणि ते चापि प्रलयं गताः ॥ ७८ ॥
संचिन्त्य संचिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य ।
वर्षाम्बुसिक्ता इव चर्मबन्धाः सर्वे प्रयत्नाः शिथिलीभवन्ति ॥ ७९ ॥
यामेव रात्रिं प्रथमामुपैति गर्भे निवासं नरवीरलोकः ।
ततः प्रभृत्यस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपमेति ॥ ८० ॥

अथ संसारं विचारयतां शोकोऽयमज्ञानस्यैव प्रपञ्चः ।

पश्य । अज्ञानं कारणं न स्याद्वियोगो यदि कारणं ।
शोको दिनेषु गच्छत्सु वर्द्धतामपयाति किं ॥ ८१ ॥

तदत्रात्मानमनुसंधेहि शोकचर्चां परिहर ।

यतः । अकाण्डपातजातानां गात्राणां मर्मभेदिनां ।
गाढशोकप्रहाराणामचिन्तैव महौषधिः ॥ ८२ ॥

ततस्तद्वचनं श्रुत्वा निःश्वस्य प्रबुद्ध इव कौण्डिल्य उत्थायाब्रवीत् । तदलमिदानीं गृहनरकनिवासेन । वनं गच्छामि । पुनः कपिलो ब्रूते ।

वने ऽपि दोषाः प्रभवन्ति रागिणां गृहे ऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते निवृत्तरागो ऽस्य गृहं तपोवनं ॥ ८३ ॥

यतः । दुःखितो ऽपि चरेद्धर्मं यत्र कुत्राश्रमे रतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणं ॥ ८४ ॥

उक्तं च । वृत्त्यर्थं भोजनं येषां संतानार्थं च मैथुनं ।
वाक् सत्यवचनार्था च स्वर्गान् अतितरन्ति ते ॥ ८५ ॥

तथा हि । आत्मा नदी भारत पुण्यतीर्था सत्योदका शीलतटा दयोर्मिः ।
अत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ॥

विशेषतश्च शृणु । जन्ममृत्युजराव्याधिवेदनाभिरभिद्रुतं ।
संसारमिममत्यन्तमसारं त्यजतः सुखं ॥ ८७ ॥
न सुखं दुःखमेवास्ति यस्मात् तदुपलभ्यते ।
दुःखार्त्तस्य प्रतीकारे सुखसंज्ञा विधीयते ॥ ८८ ॥

कौण्डिल्यो ब्रूते । एवमेव । ततो ऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः । यदद्यारभ्य मण्डूकानां वाहनं भविष्यसीति । कपिलो ब्रूते । संप्रत्युपदेशासहिष्णुर्भवान् । शोकाविष्टं ते हृदयं । तथापि कार्यं शृणु ।

सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजं ॥ ८९ ॥

अन्यच्च । कामः सर्वात्मना हेयः स चेद्धातुं न शक्यते ।
स्वभार्यां प्रति कर्तव्यः सैव तस्य हि भेषजं ॥ ९० ॥

एतच्छ्रुत्वा स कौण्डिल्यः कपिलोपदेशामृतशान्तशोकानलो यथाविधि दण्ड-

ग्रहणं कृतवान्। अतो ब्राह्मणशापान्मण्डूकान् उद्बोढुमत्र तिष्ठामि। अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जालपादस्य तत् कथितं। ततोऽसावागत्य मण्डूकनाथस्तस्य सर्पस्य पृष्ठमारूढवान्। स च सर्पस्तं पृष्ठे कृत्वा चित्रपदक्रमं बभ्राम। परेद्युश्चलितुमसमर्थं तं मण्डूकनाथोऽवदत्। किमिति भवान् अद्य मन्दगतिः। सर्पो ब्रूते। आहारविरहादसमर्थोऽस्मि। मण्डूकनाथोऽवदत्। अस्मदाज्ञया मण्डूकान् भक्षय। ततो गृहीतोऽयं महाप्रसाद इत्युक्त्वा क्रमशः स मण्डूकान् खादति। अथ निर्मण्डूकं सरो विलोक्य मण्डूकनाथोऽपि तेन खादितः। अतोऽहं ब्रवीमि स्कन्धेनापि वहेच्छत्रून् इत्यादि। देव यात्विदानीं पुरावृत्तकथनं। सर्वथा संधेयोऽयं हिरण्यगर्भो राजा। संधीयतामिति मे मतिः। राजोवाच। कोऽयं भवतो विचारः। यतो जितस्तावदयमस्माभिः। ततो यद्यस्मत्सेवया वसति तदास्तां। नो चेद्विगृह्यतां। अत्रान्तरे जम्बुद्वीपादागत्य शुकेनोक्तं। देव सिंहलद्वीपस्य सारसो राजा संप्रति जम्बुद्वीपमाक्रम्यावतिष्ठति। राजा तं ससंभ्रमं ब्रूते किं किं। शुकः पूर्वोक्तं कथयति। गृध्रः स्वगतं। साधु रे चक्रवाक मन्त्रिन् रे सर्वसाधु। राजा सकोपमाह। आस्तां तावदहं गत्वा तं समुन्मूलयामि। दूरदर्शी विहस्याह।

न शरन्मेघवत् कार्यं वृथैव घनगर्जितं।
परस्यार्थमनर्थं वा प्रकाशयति नो महान्॥ ११॥

अपरं च। एकदा न विगृह्णीयाद्बहून् राजाभिघातिनः।
सदर्पोऽप्युरगः कीटैर्बहुभिर्नाश्यते ध्रुवं॥ १२॥

देव किमितो विना संधानं गमनमस्ति। यतस्तदास्मत्पश्चात्प्रकोपोऽनेन कर्तव्यः।

अपरं च । यो ऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः ।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा ॥ १३ ॥

Fab. XIII. राजा पृच्छति कथमेतत् । दूरदर्शी कथयति । अस्त्युज्जयिन्यां माठरो नाम ब्राह्मणः । तस्य ब्राह्मणी बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता । अथ ब्राह्मणस्य कृते राज्ञः श्राद्धं दातुमाह्वानमागतं । तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत् । यदि सत्वरं न गच्छामि तदान्यः कश्चित् श्राद्धं ग्रहीष्यति ।

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसं ॥ १४ ॥

किंतु बालकस्यात्र रक्षको नास्ति तत् किं करोमि । यातु । चिरकालपालितमिमं पुत्रनिर्विशेषं नकुलं बालकरक्षार्थमवस्थाप्य गच्छामि । तथा कृत्वा स तत्र गतः । ततस्तेन नकुलेन बालकसमीपमागच्छता कृष्णसर्पो दृष्टो व्यापादितश्च । अथासौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपागम्य तस्य चरणयोर्लुलोठ । ततो ऽसौ ब्राह्मणस्तं तथाविधं दृष्ट्वा मम पुत्रो ऽनेन भक्षित इत्यवधार्य व्यापादितवान् । अनन्तरं यावदसावुपसृत्य पश्यति ब्राह्मणस्तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति । ततस्तदुपकारमेव नकुलं निरूप्य विभावितकृत्यः संतप्तचेताः स परं विषादमगमत् । अतो ऽहं ब्रवीमि यो ऽर्थतत्त्वमविज्ञाय इत्यादि ।

अपरं च देव । कामः क्रोधस्तथा लोभो हर्षो मानो मदस्तथा ।
षड्वर्गमुत्सृजेदेनं यस्मिंस्त्यक्ते सुखी भवेत् ॥ १५ ॥

राजाह । मन्त्रिन् एष ते निश्चयः । मन्त्री ब्रूते । एवमेव ।

यतः । स्मृतिस्तत्परतार्थेषु वितर्को ज्ञाननिश्चयः ।
दृढता मन्त्रगुप्तिश्च मन्त्रिणः परमो गुणः ॥ १६ ॥

अन्यच्च । सहसा विदधीत न क्रियामविवेकः परमापदां पदं ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥ ९७ ॥

तदेव यदीदानीमस्मद्वचनं क्रियते तदा संधाय गम्यतां ।

यतः । यद्यप्युपायाश्चत्वारो निर्दिष्टाः साध्यसाधने ।
संख्यामात्रं फलं तेषां सिद्धिः साम्नि व्यवस्थिता ॥ ९८ ॥

राजाह । कथमेवं सत्वरं संभवति । मन्त्री ब्रूते । देव सत्वरं भविष्यति ।

यतः । अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ ९९ ॥

विशेषज्ञोऽसौ राजा सर्वज्ञो मन्त्री च । राजोवाच । ज्ञातमेतन्मया पूर्वं मेघवर्णवचनात् तत्कृतकार्यसंदर्शनाच्च ।

यतः । कार्यानुमेयाः सर्वत्र परोक्षे गुणवृत्तयः ।
तस्मात् परोक्षवृत्तीनां कार्यैः कर्म विभावयेत् ॥ १०० ॥

राजाह । अलमुत्तरोत्तरेण । यथाभिप्रेतमनुष्ठीयतां । एतन्मन्त्रयित्वा गृध्रो महामन्त्री दुर्गाभ्यन्तरं लगितः । अथ प्रणिधिवकेनागत्य हिरण्यगर्भस्य राज्ञो निवेदितं । देव संधिं कर्तुं महामन्त्री गृध्र आगच्छन्नास्ते । राजहंसो ब्रूते । मन्त्रिन् पुनस्तत् । न मन्त्रिणा केनचिदत्रागन्तव्यं । सर्वज्ञो विहस्याह । देव न शङ्कास्पदमेतत् । यतो महाशयोऽसौ दूरदर्शी । अथवा स्थितिरियं मन्दमतीनां । कदाचित् शङ्केव न क्रियते । कदाचित् सर्वत्र शङ्का ।

तथा हि । सरसि बहुशस्ताराछायेक्षणात् परिवञ्चितः ।
कुमुदविटपान्वेषी हंसो निशास्वविचक्षणः ।
न दशति पुनस्ताराशङ्की दिवापि सितोत्पलं ।
कुहकचकितो लोकः सत्येऽप्यपायमधीक्षते ॥ १०१ ॥

तद्देव यथाशक्ति तत्पूजार्थं रत्नोपहारादिसामग्री सुसज्जीक्रियतां । तथानुष्ठिते सति स गृध्रो मन्त्री दुर्गद्वाराच्चक्रवाकेणोपगम्य सत्कृत्यानीय राजदर्शनं कारितो दत्तासन उपवेशितः । चक्रवाक उवाच । महामन्त्रिन् युष्मदायत्तं राज्यमिदं स्वेच्छयाधिभुज्यतां । राजहंसो ब्रूते । एवमेव । दूरदर्शी ब्रूते । एवमेवैतत् किंत्विदानीं बहुप्रपञ्चवचनं निष्प्रयोजनं ।

यतः । लुब्धमर्थेन गृह्णीयात् स्तब्धमञ्जलिकर्मणा ।
मूर्खं छन्दोऽनुवृत्तेन याथातथ्येन पण्डितं ॥ १०२ ॥

अन्यच्च । सद्भावेन हरेन्मित्रं संभ्रमेण तु बान्धवान् ।
स्त्रीभृत्यान् दानमानैश्च दाक्षिण्येनेतरं जनं ॥ १०३ ॥

तदिदानीं संधाय प्रस्थाप्यतामयं महाप्रतापश्चित्रवर्णो राजा । चक्रवाको ब्रूते । यथा संधानं कार्यं तदप्युच्यतां । राजहंसो ब्रूते । कति प्रकाराः संधीनां संभवन्ति । गृध्रो वदति । कथयामि श्रूयतां ।

बलीयसाभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः ।
आपन्नः संधिमन्विच्छेत् कुर्वाणः कालयापनं ॥ १०४ ॥
कपाल उपहारश्च संतानः संगतस्तथा ।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ १०५ ॥
अदृष्टनर आदिष्ट आत्मामिष उपग्रहः ।
परिक्रयस्तथोच्छिन्नस्तथा च परभूषणः ॥ १०६ ॥
स्कन्धोपनेयसंधिश्च षोडशः परिकीर्तितः ।
इति षोडशकं प्राहुः संधिं संधिविचक्षणाः ॥ १०७ ॥
कपालसंधिर्विज्ञेयः केवलं समसंधितः ।
संप्रदानाद्भवति य उपहारः स उच्यते ॥ १०८ ॥

संतानसंधिर्विज्ञेयो दारिकादानपूर्वकः ।
सद्भिः संगतसंधिस्तु मैत्रीपूर्व उदाहृतः ॥ १०९ ॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनं ।
संपत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥ ११० ॥
संगतसंधिरेवेह प्रकृष्टत्वात् सुवर्णवत् ।
अपरैः संधिकुशलैः काञ्चनः स उदाहृतः ॥ १११ ॥
आत्मकार्यस्य सिद्धिं तु समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ ११२ ॥
मयास्योपकृतं पूर्वं ममाप्येष करिष्यति ।
इति यः क्रियते संधिः प्रतीकारः स उच्यते ॥ ११३ ॥
उपकारं करोम्यस्य ममाप्येष करिष्यति ।
अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥ ११४ ॥
एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छति ।
समं हि तत्प्रमाणस्तु स च संयोग उच्यते ॥ ११५ ॥
आवयोर्योधमुख्यैस्तु मदर्थः साध्यतामिति ।
यस्मिन् पणस्तु क्रियते स संधिः पुरुषान्तरः ॥ ११६ ॥
त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति ।
यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः स्मृतः ॥ ११७ ॥
यत्र भूम्येकदेशेन पणेन रिपुरूर्जितः ।
संधीयते संधिविद्भिरादिष्टः स उदाहृतः ॥ ११८ ॥
स्वसैन्येन तु संधानमात्मामिष उदाहृतः ।
क्रियते प्राणरक्षार्थं सर्वदानादुपग्रहः ॥ ११९ ॥

कोषांशेनार्द्धकोषेण सर्वकोषेण वा पुनः ।
शेषप्रकृतिरक्षार्थं परिक्रय उदाहृतः ॥ १२० ॥
भुवां सारवतीनां तु दानादुच्छिन्न उच्यते ।
सर्वभूम्युत्थितफलदानेन परभूषणः ॥ १२१ ॥
परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते ।
स्कन्धोपनेयं तं प्राहुः संधिं संधिविचक्षणाः ॥ १२२ ॥
[परस्परोपकारश्च मैत्रः संबन्धकस्तथा ।
उपहारश्च विज्ञेयाश्चत्वारस्त्वेव संधयः ॥ १२३ ॥
एक एवोपहारश्च संधिरेव मतो मम ।
उपहारविभेदास्तु सर्वे मैत्रविवर्जिताः ॥ १२४ ॥
अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्तते ।
उपहारादृते तस्मात् संधिरन्यो न विद्यते] ॥ १२५ ॥

राजाह । भवन्तो महापण्डिताः । तदत्रास्माकं यथाकार्यमुपदिश्यतां । चक्रवाको ब्रूते । शृणु तावत् ।

आधिव्याधिपरीतापादद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥ १२६ ॥
जलान्तश्चन्द्रचपलं जीवितं खलु देहिनां ।
तथाविधमिति ज्ञात्वा शश्वत् कल्याणमाचरेत् ॥ १२७ ॥
मृगतृष्णासमं वीक्ष्य संसारं क्षणभंगुरं ।
सज्जनैः संगतं कुर्याद्धर्माय च सुखाय च ॥ १२८ ॥

तन्मम संमतेनैतदेव क्रियतां ।

यतः । अश्वमेधसहस्रं च सत्यं च तुलया धृतं ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥ १२९ ॥

अतः सत्याभिधानदिव्यपुरःसरो द्वयोरप्यनयोर्भूपालयोः काञ्चनाभिधानः संधिर्विधीयतां । गृध्रो वदति । एवमस्तु । ततो राजहंसेन राज्ञा रत्नवस्त्रालंकारोपहारैः स मन्त्री दूरदर्शी पूजितः प्रहृष्टमनाश्चक्रवाकं गृहीत्वा मयूरस्य राज्ञः समीपं गतः । तत्र चित्रवर्णेन राज्ञा सर्वज्ञे मन्त्रिणि गृध्रवचनाद्बहुमानपुरस्कारं विधाय तथाविधं संधिं स्वीकृत्य राजहंसस्य कटकं प्रस्थापितः । स राज्ञा सह सुखं तिष्ठतु । दूरदर्शी ब्रूते । देव सिद्धं नः समीहितं । इदानीं विन्ध्याचलं प्रति गम्यतां । अथ स्वस्थानमभिलषितं यथासुखमनुभवतु ॥ विष्णुशर्मणोक्तं । संधिस्तावत् कथितः । अपरं किं कथयामि तदुच्यतां । राजपुत्रा ऊचुः । आर्य त्वत्प्रसादात् सकलराज्यव्यवहाराङ्गं ज्ञातं । ततः सुखिनो भूता वयं । विष्णुशर्मोवाच । तथाप्यपरमपीदमस्तु ।

संधिः सर्वमहीभुजां विजयिनामस्तु प्रमोदः सदा ।
सन्तः सन्तु निरापदः सुकृतिनां कीर्तिश्चिरं वर्धतां ।
नीतिर्वारविलासिनीव सततं वक्षःस्थले संस्थिता ।
वक्त्रं चुम्बतु मन्त्रिणामहरहर्भूयान्महान् उत्सवः ॥ १३० ॥

इति हितोपदेशे नीतिशास्त्रे
संधिर्नाम चतुर्थः कथासंग्रहः समाप्तः ॥
॥ ४ ॥

CORRIGENDA.

p.	3	l.	2	फेणा	lege	फेन
«	5	«	4	चन्द्रो	«	चन्द्रस्
«	19	«	2	श्रतः	«	श्रतो
«	20	«	11	मार्जारः	«	मार्जारस्
«	21	«	20	जम्बुकः	«	जम्बुको
«	24	«	2	मेषो	«	मेषः
«	—	«	11	संकल्पः	«	संकल्पो
«	33	«	17	फेणा	«	फेन
«	37	«	7	प्रक्षालणाद्	«	प्रक्षालनाद्
«	40	«	15 et 19	शृगालेणा	«	शृगालेन
«	41	«	16			
«	44	«	4	दुर्बलाणि	«	दुर्बलानि
«	57	«	14	तेजमयो	«	तेजोमयो
«	59	«	17	ततो	«	ततस्
«	68	«	13	प्रवृत्तिः	«	प्रवृत्ति
«	82	«	15	पद्	«	पाद्
«	85	«	5	पथिकः	«	पथिकस्
«	89	«	5	गृह्णीत्वागतः	«	गृह्णीत्वा गतः
«	113	«	19	गृध्रो	«	गृध्रः

EX OFFICINA TYPOGRAPHICA C. F. THORMANNI.